महामुकामुकशर्मवसुरुद्रादित्यस्वरूपश्राद्धसंबंधिनः कालकामविश्वेदेवा एतानि गंधपुष्पधूपदीपवासांसि वो नम इति गंधादिकमुत्सृजेत् ।। ततोऽपसव्येन तिलघृतजलयुतमन्नं मोटकादिसहितमादाय दक्षिणाभिमुखः ॐ इदमन्नमेतद् भूस्वामिपितृभ्यो नमः इत्युत्सृजेत् ।। ततः सव्यं कृत्वा आसनसहितस्यान्नपात्रस्य चतुर्दिक्षु चतुष्कोणं मण्डलं विधाय देवान्ध्यायन्सोपस्करं तिलजलयुतमन्नमुपनीय अन्नं मधुनाभिघार्य ऋजुहस्ताभ्यामन्नपात्रमालभ्य ।। ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा।। इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढ मस्य पांसुरे स्वाहा इति पठित्वा ।। ॐ इदमन्नमित्यन्ने।।

नमः' सम्म पढिदिनू। अब अपसव्य भएर एउटा सीधा राखी इदमन्नं एतद् भूस्वामी० भनेर जल-कुश छाडि दिनू । अनि सव्य भएर बाहुनको अगाडि जलको चार कुने धर्का बनाई सीधा राखेर जौ घिऊ मह छरेर रित्तो हात देखाई ॐ पृथिवी ते पात्रं० पढेर ॐ

ॐ इमा आप इति जले ।। ॐ इदमाज्यं इति घृते ।। ॐ इदं हविरिति पुनरन्ने दक्षिणकराङ्गुष्ठं निवेश्य।। ॐ यवोसि यवयास्म द्वेषो यवयारातीरिति मन्त्रेण यवानन्नोपरि प्रक्षिप्य कुशयवजलान्यादाय ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकामुकगोत्रपितामह-प्रपितामहवृद्धप्रपितामहामुकामुकशर्मवसुरुद्रादित्यस्वरूपेभ्यः श्राद्ध-सम्बन्धिभ्यः कालकामविश्वेभ्यो देवेभ्यः एतद्वोऽन्नं सोपस्करणं नम इत्यन्नमुत्सृजेत् ।।८२।।

एवं देवकाण्डं श्राद्धं निवर्त्य हस्तौ पादौ प्रक्षाल्याऽचम्य प्रेतश्राद्ध-देशमागत्योपविश्य कृतापसव्यो दक्षिणाभिमुखः कर्मपात्रं कृत्वा

इदं विष्णु० भन्नु अनि हात जोरेर प्रश्नोत्तर न गरी, ॐ यवोसि यवयास्म० अन्नमा जौ छर्किदिनू।। अनि कुश जौ लिएर संकल्प मूल अनुसार पढिदिनू ।।८२।।

यसरी विश्वेदेवको कार्य सकेर हात-पाउ पखाली आचमन गरेर प्रेत श्राद्धतिर गई

कुशादीन्यादाय अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणश्राद्धे इदमासनं ते मया दीयते तवोपतिष्ठतामिति कुशरूपमासनमुत्सृजेत् । ततो पितृश्राद्ध-देशमागत्य विधिवत्कर्मपात्रं कृत्वा मोटकादिकमादाय ॐ अद्यामुक-गोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धेअमुकगोत्रस्य पितामहस्या-मुकशर्मणो वसुस्वरूपस्येदमासनं ते स्वधा इति स्थानत्रयेषु क्लृप्तासनेषु सर्व्वपश्चिमाश्रितस्थानस्थिते आसने मोटकरूपमासनमुत्सृजेत् ।। पुन-र्मोटकादिकमादाय ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्त-कश्राद्धे अमुक गोत्रस्य प्रपितामहस्यामुकशर्मणो रुद्रस्वरूपस्य इदमासनं ते स्वधा इति दत्तासने पूर्वं प्रपितामहाय मोटकरूपमासनमुत्सृज्य पुनर्मोट-

---

अपसव्य भएर दक्षिणतिर फर्किई कर्मपात्र बनाउनू र कुश लिएर अद्य० देखि तवोपतिष्ठताम् सम्म पढेर कुशको आसन बाहुनमा राखिदिनू । अनि पितृको श्राद्धतिर आएर विधिपूर्वक कर्मपात्र बनाई मोटक लिएर संकल्प गर्दा - ॐ अद्यामुक० देखि ते स्वधा० पढेर

कादिकमादाय ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्रस्य वृद्ध प्रपितामहस्यामुकशर्मणो आदित्यस्वरूपस्य इदमासनं ते स्वधा इति सर्वं पूर्वं वृद्धप्रपितामहाय मोटकरूपमासनमुत्सृजेत् । ततः प्रेतवर्ज्यं पितामहादीनुद्दिश्य पितृनावाहयिष्ये इत्युक्त्वा ॐ उशंतस्त्वा निधी मह्युशंतः समिधीमहि ।। अशन्नु शतऽआवह पितॄन् हविषेऽ-अत्तवे ।। इति पितामहादीनावाह्य ।। ॐ अपहता असुरारक्षाꣳसि वेदिषद इति श्राद्धस्थाने तिलान् विकीर्य ।। ॐ आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः।। अस्मिन्यज्ञेस्वधया मदन्तोधिब्रुवन्तु तेवन्त्वस्मान् इति मन्त्रं जपेत् ।।८३।।

पितामह, प्रपितामह र वृद्ध प्रपितामह तीनै जनाको भिन्न भिन्न संकल्प मूल अनुसार पढेर मोटकको आसन दिनू । अनि केवल पितामहादीलाई- ॐ उशन्तस्त्वा० ॐ अपहता० पढेर तिल छरिदिनु । अनि ॐ आयन्तुनः० मन्त्र पढिदिनू ।।८३।।

ततोऽर्घार्थं पूर्वभागे एकं पुटकमासाद्य तत्पश्चिमभागे दक्षिणसंस्थं पुटकपात्रत्रयमासाद्य तेषु चतुष्टयेषु पवित्रेस्थ इति मंत्रेण प्रत्येकं दक्षिणाग्राणि पवित्राणि धृत्वा जलतिलगंधपुष्पाणि स्वस्वमन्त्रैः प्रत्येकं तेषु क्षिपेत् ।। ततः प्रेतार्घपात्रं वामहस्ते कृत्वा नमो नारायणायेति मंत्रेणान्नपात्रोपरि पवित्रम् उत्तराग्रं धृत्वा या दिव्या ऽआप इत्यादिमंत्रेणार्घपात्रस्थजलं दक्षिणहस्तेनाच्छादितमभिमंत्र्य कुशादिकमादाय अद्यामुकगोत्रामुकप्रेतसपिण्डीकरणश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम् इति पवित्रोपरि चतुर्भागजलं दददुत्सृजेत् । ॐ अद्यामुकगोत्रामुकप्रेतार्घपात्रोदकम् अमुकगोत्राणां पितामहप्रपितामहवृद्धप्रपितामहानाम-

---

अब अर्घको निम्ति तीन दुना यथा क्रमले राखेर सबैमा मन्त्र पढ्दै पवित्र राख्नू र जल तिल गन्ध पुष्प मन्त्र पढ्दै दुनाहरूमा राख्नू । अनि प्रेतको अर्घपात्र बायाँ हातमा लिई नमो नारायणाय भनेर बाहुनमा फूल पवित्र राखिदिनु र या दिव्या० पढेर दुना

मुकामुकशर्मणामर्घपात्रोदकेन संयोजयिष्ये इत्युक्त्वा पितामहादिपात्रत्रये प्रेतार्घपात्रजलस्य भागत्रयं कृत्वा एकैकं भागं वक्ष्यमाणमन्त्रैः संयोजयेत्।। प्रेतार्घपात्रजलविभागे ये समाना इति मन्त्रद्वयपाठः।। निरूप्य चतुरः पिण्डान् श्राद्धदः प्रतिनामतः।। ये समाना इति द्वाभ्यामाद्यंतु विभजेत्त्रिधा।। एष एव विधिः प्रोक्त अर्घपात्रचतुष्टये इति वचनात् ।। मिताक्षरायां स्मृत्यर्थसारे च ।।

प्रेतार्घपात्रजलमादौ पितामहार्घपात्रे संयोज्याविशिष्ट जलेन प्रेतार्घं दद्यादित्युक्तम् ।।८४।।

तत्र क्रमः ।। सव्यं कृत्वाऽऽचम्याऽपसव्यं कृत्वा अन्यत् पुटकत्रयमग्रे

ढाकी कुश लिएर संकल्पमा अद्यामुक० देखि तवोपतिष्ठताम् सम्म पढ्नू । अनि मूल अनुसार प्रतिज्ञा संकल्प गर्नू र पितामहादि तीनै पात्रमा प्रेतार्घको जल तीन भाग गरेर एकेक भाग अगाडिका मन्त्रहरू भन्दै अलि अलि मिलाउनू ।।८४।।

धृत्वा प्रेतार्घपात्रं गृहीत्वा ये समानाः समनसः पितरो यमराज्ज्ये ।। तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पताम् ।। ये समानाः समनसो जीवाजीवेषु मामकाः तेषां श्रीर्मयि कल्पतामस्मिंल्लोके शतꣳसमाः।। इति मंत्रौ पठित्वा प्रेतार्घपात्रस्थलं तृतीयभागं पुटकान्तरे धृत्वा पुनरपि मंत्रद्वयं पठित्वा प्रेतार्घपात्रावशिष्ट तृतीयभागजलं पुटकान्तरे धृत्वा प्रथमपुटकस्य विभक्तजलतृतीयभागं प्रेतार्घपात्रे कृत्वा पवित्रपुष्पसहितं प्रेतार्घमादाय ॐ ये समानाः समनसो जीवाजीवेषु मामकाः। तेषां श्रीमयिकल्पतामस्मिँल्लोके शतꣳसमाः।। संसृजंतु त्वा पृथिवी वायुरग्निः प्रजापतिः।। संसृजध्वं च पूर्वेभिस्त्रिभिश्च पितृभिः सह।। संगच्छध्वं संवदध्वं संवो मनांसि जानताम् ।। देवा भागं यथा पूर्वे संजातानामुपासते।।

यसको क्रममा-सव्य भएर आचमन गरी अपसव्य भएर प्रेतार्घ बायाँ हातमा उचाली प्रपितामहको अर्ध दाहिने हातमा लिई ॐ ये समाना० आदि मन्त्रहरू पढी

समानो मंत्रः समिति समानो समानं मनः सह चित्तमेषां समानमन्त्रमभिमन्त्रये वः। समानेन वो हविषा जुहोमि समानीव आकूतिः समाना हृदयानि वः समानवस्तु वो मनो यथा वः सुसहासति ।। मधु वातेति ऋचमपि पठेदिति केचित् ।। इति मंत्रान्पठित्वा प्रेतार्घपात्रस्थतृतीयभागजलं पितामहार्घपात्रजले मेलयेत् ।। एवमपरं पुटकद्वयस्थितार्घपात्रजलं तृतीयभागद्वयं क्रमेण प्रत्येकं मंत्रान् पठित्वा प्रपितामहार्घपात्रजले वृद्धप्रपितामहार्घपात्रजले च क्रमेण मेलयेत् ।। ततः अमुकगोत्रामुक-प्रेतामुकगौत्रैः स्वपितृपितामहप्रपितामहैरमुकामुकशर्मभिर्वसुरुद्रादित्य-स्वरूपैः सहसायुज्यं गच्छेत्युक्त्वा पितामहार्घपात्रं वामहस्ते कृत्वा ॐ नमो नारायणायेति मन्त्रेण पवित्रमन्त्रपात्रोपरि धृत्वा ॐ या दिव्या आपः पयसेत्यादिना अर्घपात्रस्थजलमभिमंत्र्य मोटकादिकमादाय ॐ

अलिकति जल प्रेतार्घमा मिलाउनु । अब यही क्रमले संकल्प गर्दैं पितामह र पितृको

अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्र पितामहामुकशर्मन् वसुस्वरूपैष तेऽर्घः स्वधेति पवित्रोपरि अर्घजलं दद्दुत्सृजेत् ।। पवित्रपुष्पसहितमर्घपात्रमग्रे धारयेत् ।। ततः प्रपितामहार्घ-पात्रं वामहस्ते कृत्वा ॐ नमो नारायणेति मन्त्रेणान्नपात्रोपरि धृत्वा ॐ या दिव्याः आप इत्यादिनार्घपात्रस्थं जलमभिमंत्र्य मोटकादिक-मादाय ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणश्राद्धे अमुकगोत्र-प्रपितामहामुकशर्मन् रुद्रस्वरूपैष तेऽर्घः स्वधेति पूर्ववदुत्सृजेत् ।। पवित्रपुष्पसहितमर्घपात्रमग्रे स्थापयेत् ।। तृतीयार्घपात्रं वामहस्ते कृत्वा ॐ नमो नारायणायेति पवित्रमन्नपात्रे धृत्वा ।। ॐ या दिव्या आपः इत्यादिना अर्घपात्रस्थं जलमभिमंत्र्य मोटकादिकमादाय ॐ अद्यामुकगोत्र-स्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अद्यामुकगोत्रवृद्धप्रपितामहा-

पनि मन्त्र पढेर मिलाउनु पर्दछ । सबैको संकल्प मूलमा भिन्न भिन्न छ । अनि

मुकशर्मन्नादित्यस्वरूपैष तेऽर्घः स्वधेति पूर्ववदर्घमुत्सृजेत् ।। पवित्र-पुष्पसहितमर्घपात्रमग्रे स्थापयेत् ।। ततः प्रेतार्घपात्रं प्रेतासनवामपार्श्वे प्रेताय स्थानमसीत्युत्तानमेव स्थापयित्वा तदुपरि कुशान्दद्यात् ।।८५।।

ततः वृद्धप्रपितामहार्घपात्रस्थजलादिकं प्रपितामहार्घपात्रे कृत्वा तत्सर्वं पितामहार्घपात्रे कृत्वा पितामहार्घपात्रम् उत्तानं प्रपितामहार्घपात्रोपरि धृत्वा तद्द्वयं उत्तानैव वृद्धप्रपितामहार्घपात्रोपरि धृत्वा पात्रत्रयमेकदैव पिता-महासनवामपार्श्वे पितामहादिभ्यः स्थानमसीति न्युब्जंकृत्वा तदुपरि कुशत्रयं

पितृहरूको अर्घपात्र उसकै स्थानमा राख्नू । अनि प्रेतार्घपात्र ब्राह्मणको बायाँतिर प्रेताय स्थानमसी भनेर उत्तानै राखि दिनु त्यसमाथि तीन टुक्रा कुश राख्नू ।।८५।।

अनि वृद्ध प्रपितामहको अर्घको जल-फूल पितामहको अर्घमा र पितामहको अर्घको जल पिताको अर्घमा खन्याएर तीनै दुनाहरू खपटेर सव्य भई आँखामा जल तच्चक्षु० पढेर लगाई अपसव्य भएर तीनै दुना पितामहको बायाँ तिर पितामहादिभ्यः ० भनेर घोप्ट्याइदिनु। र त्यसमाथि तीन टुक्रा कुश राखि दिनू । त्यो दक्षिणा पर्यन्त नचलाउनू ।।८६।।

दद्यात् ।। एवं स्थापितमर्घपात्रचतुष्टयं दक्षिणापर्य्यन्तं न चालयेत् ।।८६।।

क्रमेण प्रेतमारभ्य गंधादिभिः सर्वान्संपूज्य कुशादिकमादाय अद्यामुकगोत्रामुकप्रेत सपिण्डीकरणश्राद्धे एतानि गंधपुष्पधूपदीपवासांसि ते मया दीयते तवोपतिष्ठंतामिति प्रेताय गंधादिकमुत्सृजेत् ।। पुनर्मोटकादिकमादाय ।। ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्राः पितामहप्रपितामहवृद्धप्रपितामहाः अमुकामुकशर्मणो वसुरुद्रादित्यस्वरूपाः एतानि गंधपुष्पधूपदीपवासांसि युष्मभ्यं स्वधा इति पितामहादिभ्यो गन्धादिकमुत्सृजेत् ।।८७।।

ततः प्रेतासनस्य चतुर्द्दिक्षु वामावर्तेन चतुष्कोणं मण्डलं विधाय अपरं पितामहादित्रिके मण्डलं कुर्य्यात् ।। ततः सव्यं कृत्वा प्राङ्मुख उपवीति पातितदक्षिणजानुः पुटकादौ सघृतमन्नं कृत्वा पुटकादिजले

ॐ अग्नये कव्यवाहनाय स्वाहा। इदमग्नये कव्यवाहनाय ।। ॐ सोमाय पितृमते स्वाहा । इदं सोमाय पितृमते।। इति आहुतिद्वयं तदन्नाग्रं जुहुयात् ।। अपसव्यं कृत्वा ।। अवशिष्टमन्नं पितामहादिपात्रे किञ्चित् दद्यात् ।। ततः क्रमेण प्रत्येकं सोपस्करमन्नमुपनीय पृथक् पुटकस्थित-सतिलजलञ्चोपनीय प्रेतपात्रादिस्थितान्नेषु मधु दद्यात् ।। ततः पात्रालं-भनाङ्गुष्ठावगाहनं विना ।। पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा। इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाꣳसुरे स्वाहा इति पठित्वा ।। अपहता असुरा रक्षाꣳसि वेदिषदः । इत्यन्नोपरि प्रचुरतिलान्प्रक्षिप्य कुशादीन्यादाय अद्यामुकगोत्रा-यामुकप्रेताय सपिण्डीकरणश्राद्धे इदमन्नं सोपस्करणं ते मया दीयते तवोपतिष्ठतामिति प्रेतान्नमुत्सृजेत् ।। ततः पितामहान्नपात्रे व्यस्ताभ्यां

हस्ताभ्यां न्युब्जाभ्यामालभ्य ।। ॐ पृथिवी ते इत्यादि जुहोमि स्वाहेत्यन्तं इदं विष्णुरित्यादि सुरे इत्यन्तं च पठित्वा ।। ॐ इदमन्नं । ॐ इमा आपः। ॐ इदमाज्यं । ॐ इदं हविरिति क्रमेणान्नजलघृतादिषु दक्षिणाङ्गुष्ठं निवेश्य।। ॐ अपहता असुरा रक्षाꣳसि वेदिषद इत्यन्नोपरि तिलान्प्रक्षिप्य मोटकादीन्यादाय ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्राय पितामहायामुकशर्मणे वसुस्वरूपायैतत्तेऽन्नं सोपस्करणं स्वधेति पितामहायान्नमुत्सृजेत् ।। ततः प्रपितामहान्नपात्रमालभ्य पूर्ववत् पृथिवी ते इत्यादि कृत्वा मोटकादीन्यादाय।। ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्राय प्रपितामहायामुकशर्मणे रुद्रस्वरूपाय एतत्तेऽन्नं सोपस्करणं स्वधेति प्रपितामहायान्नमुत्सृजेत् ।। ततो वृद्धप्रपितामहान्नपात्रमालभ्य

पूर्ववत् पृथिवी ते इत्यादिकं सर्वं कृत्वा मोटकादीन्यादाय ।। ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्राय वृद्धप्रपितामहायामुकशर्मणे आदित्यस्वरूपायैतत्तेऽन्नं सोपस्करणं स्वधेति वृद्धप्रपितामहायान्नमुत्सृजेत् ।। ततः सव्येन । मधुवाता इति ऋचं ।। ॐ मधु मधु मधु इति च जपित्वा ।। अन्नहीनमित्यादि च पठित्वा ।। नमस्तुभ्यं विरूपाक्षेति च श्लोकं पठेत् ।।८८।।

ततः अपसव्येन ।। पितामहान्नपात्रसन्निधौ आस्तृतदक्षिणाग्रकुशत्रयेण भूमिं प्रोक्ष्य मोटकं चादाय- असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम्।। उच्छिष्टभागधेयानां दर्भेषु विकिरासनम् - इति आसनं दद्यात् ।। सतिल-घृतमन्नमादाय जलेनाऽऽप्लाव्य मोटकं चादाय । अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले मम।। भूमौ दत्तेन तृप्यंतु तृप्तायान्तु परां गतिमित्या-

स्तृतकुशोपरि तदन्नं विकिरेत् ।। ततः सव्यंकृत्वाऽऽचम्य हरिं स्मृत्वा अपसव्यं कृत्वा ततः प्रेतपिण्डदानार्थमेकां पितामहादिकपिण्डदानार्थमपरां हस्तमितां चतुरङ्गुलोच्छ्रितां सैकतादिकां दक्षिणप्लवां पिण्डिकां निर्माय प्रेतपिण्डिकायां रेखाकरणोल्मुकभ्रमणं विनैव छिन्नमूलकुशानास्तीर्य्य अपरपिण्डिकामध्ये वामेन पाणिना दर्भपिंजुली गृहीत्वा दक्षिणहस्ते कृत्वा तन्मूलेन सव्योपगृहीतदक्षिणपाणिना ॐ अपहता असुरा रक्षाꣳसि वेदिषद इति मंत्रेण दक्षिणाग्रां प्रादेशप्रमाणां रेखां सकृदुल्लिखय दर्भपिञ्जुलिमुत्तरस्यां क्षिपेत् ।। ततो रेखोपरि ॐ ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति।। परापुरो निपुरो ये भरन्त्यग्निष्ठाँल्लोकात्प्रणुदात्यस्मादिति मन्त्रेणाङ्गारं भ्रामयित्वा दक्षिणतः क्षिपेत् ।। ततो रेखायां छिन्नमूलकुशानास्तृणुयात् ।।८९।।

ततः सव्यंकृत्वाऽऽचम्याऽपसव्यं कृत्वा पुटकद्वये गंधपुष्पतिलजलानि कृत्त्वा एकं पुटकं वामहस्ते कृत्वा कुशादिकमादाय अद्यामुकगोत्रा-मुकप्रेत सपिण्डीकरणश्राद्धे पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठतामिति पूर्वपिण्डिकायां छिन्नमूलकुशोपरि अवनेजनं दद्यात्।। ततोऽपरपुटकं वामहस्ते कृत्वा मोटकादीन्यादाय ।। ॐ अद्यामुकगोत्रस्या-मुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे पिण्डस्थाने अमुकगोत्रपितामहा-मुकशर्मन्वसुस्वरूपाऽत्रावनेनिक्ष्व ते स्वधेति द्वितीयपिण्डिकाया आस्तृत-कुशमूलसन्निधाने पितामहायावनेजनं दद्यात् ।। पुनर्मोटकादीन्यादाय।। ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे पिण्डस्थाने अमुकगोत्र प्रपितामहामुकशर्मन् रुद्रस्वरूपात्रावनेनिक्ष्व ते स्वधेति आस्तृत-कुशमध्ये प्रपितामहायावनेजनं दद्यात् ।। पुनर्मोटकादीन्यादाय ॐ

अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे पिण्डस्थाने अमुकगोत्र वृद्धप्रपितामहामुकशर्मन्नादित्यस्वरूपात्रावनेनिक्ष्व ते स्वधेति आस्तृतकुशाग्रे वृद्धप्रपितामहायाऽवनेजनं दद्यात् ।। ततः कपित्थप्रमाणान् चतुरः पिण्डान्निर्माय प्रथमपिण्डं कुशतिलसहितमादाय ।। ॐ अद्यामुक-गोत्रामुकप्रेत सपिण्डीकरणश्राद्धे एष पिण्डस्ते मया दीयते तवोपतिष्ठता-मिति पूर्वपिण्डिकायां कुशोपरि प्रेतपिण्डं दद्यात् ।। ततो पश्चिमपिण्डिकायां मोटकादीन्यादाय पिण्डं चादाय ।। ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्र पितामहामुकशर्मन्वसुस्वरूपैष ते पिण्डः स्वधेति प्रथमावनेजनस्थाने पितामहाय पिण्डं दद्यात् ।। पुनर्मोटकादीन्यादाय पिण्डं चादाय।। ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्र प्रपितामहामुकशर्मन् रुद्रस्वरूपैष

ते पिण्डः स्वधेति द्वितीयावनेजनस्थाने प्रपितामहाय पिण्डं दद्यात् ।। पुनर्मोटकादीन्यादाय पिण्डं चादाय ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्र वृद्धप्रपितामहामुकशर्मन्नादित्यस्वरूपैष ते पिण्डः स्वधेति तृतीयावनेजनस्थाने वृद्धप्रपितामहाय पिण्डं दद्यात्।। ततः पितामहादिपिण्डास्तरणकुशमूलेन लेपभागभुजस्तृप्यन्त्विति करं प्रोक्ष्य सव्यं कृत्वाऽऽचम्य हरिं स्मरेत् ।। ततोऽपसव्यं कृत्वा दक्षिणाभिमुखो मन्त्रपाठं विना प्रेतं भास्वरमूर्तिं चिन्तयेत् ।। ततः सव्येन पितामहादीनुद्दिश्य दक्षिणाभिमुखः ॐ अत्र पितरो मादयध्वं यथाभागमाबृषायध्वमिति पठित्वा उत्तराभिमुखो भूत्वा श्वाशं नियम्य भास्वरमूर्तिं पितामहादिकं ध्यायन् ।। अमी मदन्त पितरो यथाभागमाबृषायिष त इति पठेत् ।। ततः प्रेतावनेजनपात्रं वामहस्ते कृत्वा कुशादी-

न्यादाय अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणश्राद्धपिण्डे इदं प्रत्यवनेजनं ते मया दीयते तवोपतिष्ठतामिति प्रेताय प्रत्यवनेजनं दत्वा।। पितामहाद्यवनेजनपात्रं वामहस्ते कृत्वा मोटकादीन्यादाय ।। ॐ अद्यामुक-गोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धपिण्डे अमुकगोत्र पितामहा-मुकशर्म्मन्वसुरूपेदं प्रत्यवनेजनं ते स्वधेति पितामहाय प्रत्यवनेजनं दत्वा ॥९०॥

ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तिकश्राद्धपिण्डे अमुकगोत्र प्रपितामहामुकशर्मन् रुद्रस्वरूपेदं प्रत्यवनेजनं ते स्वधेति प्रपितामहाय प्रत्यवनेजनं दत्वा ।। ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धपिण्डे अमुकगोत्र वृद्धप्रपितामहामुकशर्म्मन्ना-दित्यस्वरूपेदं प्रत्यवनेजनं ते स्वधेति वृद्धप्रपितामहाय प्रत्यवनेजनं दद्यात्।। ततो नीवीं विस्त्रंस्य । सव्यंकृत्वाऽऽचम्य अपसव्यं कृत्वा वामेन पाणिना

धृतं सूत्रं दक्षिणेनादाय मन्त्रपाठं विना ।। प्रेतैतत्ते वास इत्युभाभ्यां हस्ताभ्यां पिण्डोपरि सूत्रं धारयेत् ।। सूत्रमादाय ।। ॐ नमो वःपितरो रसाय नमो वःपितरः शोषाय नमो वःपितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरोघोराय नमो वः पितरो मन्यवे नमो वःपितरः पितरो नमो वो गृहान्नः पितरो दत्तसतो वः पितरो द्वेष्मैतद्वः पितरो वास इति मन्त्रं पठित्वा प्रत्येकं पिण्डोपरिं सूत्रं धारयेत् ।। ततः प्रत्येकं पिण्डान् गंधादिभिः संपूज्य कुशादिकमादाय अद्यामुकगोत्रामुकप्रेत सपिण्डीकरणनिमित्तकश्राद्धपिण्डे एतानि गंध पुष्प धूप दीप-नैवेद्यानि ते मया दीयन्ते तवोपतिष्ठन्तामिति प्रेताय गन्धादिकमुत्सृजेत् ।। मोटकान्यादाय ।। ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरण-निमित्तकश्राद्धपिण्डे अमुकगोत्राः पितामह प्रपितामहवृद्धप्रपितामहा अमुका-

मुकशर्माण वसुरुद्रादित्यस्वरूपा एतानि सूत्रगन्धपुष्पधूपदीपैक्षवादि नैवेद्यानि युष्मभ्यं स्वधेति पितामहादिभ्यो गन्धादिकमुत्सृजेत्। ततः पिण्डसमीपे तत् तत् पिण्डशेषान्नं विकिरेत्।।१०।।

ततः सव्येन ।। शिवा आपः सन्तु इति जलम् ।। सौमनस्यमस्तु इति पुष्पम् ।। अक्षतं चारिष्टमस्तु- इति तण्डुलान् विश्वेदेवान्नपात्रोपरि क्षिपेत् ।। ततोऽपसव्यं कृत्वा । शिवा आपः सन्तु इति जलम् ।। सौमनस्यमस्तु इति पुष्पम् ।। अक्षतं चारिष्टमस्तु इति तण्डुलान् प्रेतान्नपात्रोपरि क्षिपेत् । कुशादिकमादाय अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठतामित्यक्षय्योदकं दत्वा सव्यं कृत्वा अघोरः प्रेतोस्तु इति दक्षिणां दिशं पश्यन्पिण्डोपरि पूर्वाग्रां जलधारां दद्यात् ।। ततः सपवित्रान् कुशान्पिण्डोपरि धृत्वा मन्त्रपाठं विना पुटकादिस्थजलादिना इदमूर्ज्जं ते मया दीयते तवोपतिष्ठता-

मिति सपवित्रकुशोपरि दक्षिणाग्रां पयोधारां दद्यात् ।। दक्षिणादानं विसर्जनं चान्ते सहैव भवति ।।९२।।

सुवर्णरूप्यदर्भैस्तु तस्मिन्पिण्डे ततस्त्रिधा । कृत्वा पितामहादिभ्यः पितृभ्यश्च समर्प्ययेत् इति ब्रह्मपुराणवचनात् ।। सुवर्णरूप्यदर्भैः पिण्ड-विभागः कर्तव्यः।। ततः पिण्डे सूत्रादिकमपनीय ।। अद्यामुकोत्रस्यामुक-प्रेतस्य पिण्डं पितामहादिपिण्डैः सह संयोजयिष्ये' भनेर सुन वा चादीको टुक्रो र कुश दुई हातमा लिएर यो तलको मन्त्र पढी प्रेतपिण्डलाई तीन भागमा बाँड्नु, विभाजन गर्नु र मन्त्र पढ्दै जानु । ये समानाः इति। त्यसपछि पहिलो पिण्डको भाग लिएर-ये समानाः संसृजंतु त्वा पृथिवी० सन्सृजध्वं० सङ्गच्छध्वं० समानो मन्त्रः ।। समानीव०।। मधुव्वाता इत्यादि मन्त्रहरू पढेर संङ्कल्प लिनु - अमुकगोत्रामुकप्रेतामुकगोत्रेण

स्वपित्राऽमुकशर्मणावसुस्वरूपेण संसृजस्व भनेर' पितामहको पिण्डमा दहि, मह वा चिनी मिसाई वाटुलो पिण्ड बनाउनु । यस्तै प्रकारले द्वितीय पिण्ड लिएर माथिका सबै मन्त्रहरू पढेर सङ्कल्प भन्नु- अमुकगोत्रा- मुकप्रेत अमुकगोत्रेण स्वपितामहेनाऽमुकशर्मणा रुद्रस्वरूपेण संसृजस्व भनेर प्रपितामहपिण्डमा जोडेर दहि, मह आदि मिसाई बाटुलो (गोलो) पिण्ड बनाउनु। यस्तै प्राकारले तृतीयपिण्डिभाग लिएर पूर्वोक्त सवैमन्त्रहरू पढेर-अमुकगोत्रामुकप्रेतामुकगोत्रेण स्वप्रपितामहेना-मुकशर्मणा आदित्यस्वरूपेण संसृजस्व, भनेर अनि वृद्धप्रपितामहको पिण्डमा जोडेर दहि, मह आदि मिसाएर बाटुलो (गोलो) बनाउनु । अनि पिण्डमेलन गरेपछि यो मन्त्र पढ्नु - एष वोऽनुगतः प्रेतः पितृभाग-मवाप्तवान् । शुभं भवतु शेषाणां जायतां चिरजीविनः। त्यसपछि

पितृपूर्वक पितामहादिलाई संझेर गन्ध, पुष्प, धूप, दीप, नैवेद्यादि तीन ओटै पिण्डमा चढाउनु र मोटकादि लिएर यो संकल्प भन्नु- ॐअद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः सपिण्डीकरणश्राद्धपिण्डे अमुकगोत्राः पितामहप्रपितामहवृद्धप्रपितामहाः अमुकामुकामुक-शर्म्मणो वसुरुद्रादित्यस्वरूपा एतानि गन्धपुष्पधूपदीपनैवेद्यानि युष्मभ्यं स्वधा, भनेर चन्दन, फूल, दीप, नैवेद्यआदि त्यहीं छाडिदिनु । (केचित्तु प्रेतपिण्डावयवत्रयेण संयोजितांस्त्रीन् पिण्डानिदानींतन मृतमारभ्य पुरुषत्रयाय पार्वणवत् पुनरपि नामगोत्राद्युच्चार्य दद्यादित्याहुः)।।ततः पितामहाद्यन्नपात्रेषु क्रमेण प्रत्येकं।। ॐ शिवा आपः सन्तु इति जलम् ।। ॐ सौमनस्यमस्तु इति पुष्पम् ।। ॐ अक्षतं चारिष्टमस्तु इति तण्डुलान् दत्वा । ततः सव्यंकृत्वा कर्म्मपात्रोदकं कुशैः प्रतिमन्त्रं स्वशिरस्यभिषिञ्चेत् । ॐ अस्मत्कुले

दीर्घमायुरस्तु ।। ॐ शान्तिरस्तु ।। ॐ पुष्टिरस्तु ॐ वृद्धिरस्तु ।। ॐ यद्यच्छ्रेयस्तदस्तु ।। ॐ यत्पापं तत् प्रतिहतमस्तु इति भूमौ । ॐ द्विपदेचतुष्पदेभ्यः शान्तिरस्तु ।। ततोऽपसव्यं कृत्वा मोटकादीन्यादाय।। ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्म्मणः सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्रस्याऽस्मत्पितामहस्यामुकशर्मणो वसुस्वरूपस्य दत्तैतदन्नपानादिकमक्षय्यमस्त्विति पितामहायाक्षय्योदकं दत्वा।। ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्रस्यास्यत्रपितामहस्यामुकशर्म्मणो वसुस्वरूपस्य दत्तैतदन्नपानादिकमक्षय्यमस्त्विति पितामहायाक्षय्योदकं दत्त्वा- ॐ अद्यामुकगोत्रस्यास्मतपितुरमुकशर्मणः सपिण्डीकरणश्राद्धे अमुकगोत्रस्यास्मत्प्रपितामहस्यामुक शर्मणो रुद्रस्वरूपस्य दत्तैतदन्नपानादिकमक्षय्यमस्त्विति, भनेर प्रपितामहलाई अक्षय्योदक

दिएर सङ्कल्प भन्नु- ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्म्मणः सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्रस्य वृद्धप्रपितामहस्यामुकशर्म्मणो आदित्यस्वरूपस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु, भनेर वृद्धप्रपितामहलाई अक्षय्योदक दिएर सव्य हुनु, अनि हात जोरेर दक्षिण दिशा तिर हेर्दै- ॐ अघोराः पितरः सन्तु, भनेर पितामहादि तीन पिण्ड माथि पूर्वाग्र पारी जलधारा दिनु । त्यसपछि सव्यले नै पूर्वाभिमुख भई आशिष प्रार्थना गर्नु - ॐ गोत्रं नो वर्द्धताम् ।। ॐ वर्द्धतामिति प्रतिवचनम् ।। ॐ दातारो नोऽभिवर्द्धन्ताम् ।। ॐ वर्द्धन्ताम् ।। ॐ वेदाः सन्ततिरेव च।। ॐ सन्तु ।। ॐ श्रद्धा च नो माव्यगमत् ।। ॐ मागात् ॐ बहुदेयं च नोऽस्तु ।। ॐ अस्तु ।। ॐ अन्नं च नो बहु भवेत् ।। ॐ भवतु ।। ॐ अतिर्थींश्च लभेमहि ।। ॐ लभध्वम् ।। ॐ याचितारश्च

नः सन्तु ।। ॐ सन्तु ।। ॐ मा याचिष्म कञ्चन ।। ॐ मा याचेथाः। ॐ एताः आशिषः सत्या सन्तु ॐ सन्तु, भनेर श्राद्धकर्ताले ब्राह्मणका हातबाट तिलक लगाउनु । त्यसपछि अपसव्य भएर पिण्डमाथि पवित्रसहितको कुश र जल हातमा लिई चढाउनु । अनि निम्नमन्त्र पढी- ॐ ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिश्रुतम् ।। स्वधास्थ तर्प्पयत मे पितॄन्, भनेर पवित्रसहितजलले पिण्डमाथि दक्षिणतिर धारा बनाई अर्पण गर्नु । त्यसपछि सव्य भएर पिण्ड सुघ्नु र अपसव्य भई पिण्ड उठाउनु । त्यहाँका कुशहरू आगोमा राख्नु।। शङ्ख चक्रं च सँलिख्य ।। ॐ शङ्खाय नमः।। ॐ चक्राय नमः, भनेर चन्दन, फूलादिले शंख चक्र पूजा गरेर अपसव्य भएर न बोली पिण्डहरूलाई वेदीमाथि लिएर पूजन गर्नु । यो मन्त्रले सव्यले० - ॐ वसन्ताय

नमस्तुभ्यं ग्रीष्माय च नमो नमः ।। वर्षाभ्यश्च शरत्संज्ञ ऋतवे च नमो नमः ।। हेमन्ताय नमस्तुभ्यं नमस्ते शिशिराय च ।। माससम्वत्सरेभ्यश्च दिवसेभ्यो नमो नमः इति।। त्यसपछि सव्यले विश्वेदेवार्घपात्र चलाउनु, अपसव्यले पितामहाद्यर्घपात्र उत्तानो गराउनु । सव्यले दक्षिणा दिनको लागि कुश, जौ, जल, दक्षिणा द्रव्य लिएर संकल्प गर्नु- ॐ अद्यामुकगोत्रस्य पितुरमुकशर्म्मणः सपिण्डीकरणनिमित्तकामुकगोत्र-पितामहप्रपितामहवृद्धप्रपितामहामुकामुकशर्म्मवसुरुद्रादित्यस्वरूपश्राद्ध-सम्बन्धिनां कालकामविश्वेषां देवानां कृतैतच्छ्राद्धप्रतिष्ठार्थं हिरण्यमग्निदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे, भनेर विश्वेदेव श्राद्धको दक्षिणा दिनु । (सर्वकर्मापसव्येन दक्षिणादानवर्जितमिति जमदग्निवचनात् पित्रादि दक्षिणावाक्यम्) फेरि सव्यले नै कुश, तिल, जल, दक्षिणाद्रव्य

लिएर संकल्प गर्नु- ॐ अद्यामुकगोत्रस्य पितुरमुकशर्मणः कृतैतत् सपिण्डीकरणश्राद्धप्रतिष्ठार्थमिदं रजतं चंद्रदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे, भनेर पितृश्राद्धको दक्षिणादिनु फेरि कुश-तिल-दक्षिणाद्रव्य लिएर सङ्कल्प गर्नु- ॐ अद्यामुकगोत्रस्य पितुरमुकशर्मणः सपिण्डीकरणनिमित्तकश्राद्धे कृतैतदमुकगोत्रपितामहप्रपितामहवृद्धप्रपितामहवसुरुद्रादित्यस्वरूपामुकामुकामुकशर्म्माणः श्राद्धप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतं नाना नामगोत्रेभ्यो ब्राह्मणेभ्यो दक्षिणां दातुमहमुत्सृजे, भनेर पितामहादिश्राद्धको दक्षिणा दिनु त्यसपछि सव्यले नै 'कालकामविश्वेदेवाः प्रीयन्तामिति' भनेर विश्वेदेवविसर्जन गरेर अपसव्यले स्वस्ति भनेर पितृविसर्जन गर्नु। अनि- व्वाजे व्वाजे वत व्वाजिनो नो धनेषु विप्राऽअमृता ऋतज्ञाः ।। अस्य मध्वः पिबत मादयध्वं तृप्ता यात

पथिभिर्देवयानैः, भनेन पितामहादीहरूलाई विसर्जन गर्नु, त्यसपछि सव्यले ॐ देवताभ्य० इत्यादिमन्त्र तीन पटक भनेर बत्ती ढाकिदिनु, सव्यभई हात, पाउ, धोएर आचमन गर्नु र विष्णु स्मरण गर्नु, त्यसपछि यो मन्त्र पढ्नु - ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च ।। स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादितिश्रुतिः।। अनि विष्णुलाई पनि स्मरण गर्दै श्राद्धका उपर्युक्त वस्तुहरू ब्राह्मणलाई दिनु । सहगमने तु पित्रैकोदिष्ट-वन्मात्रेकोद्दिष्टं सहैव विधाय पित्रर्घपात्रपितामहार्घपात्रे मेलयित्वा ।। ॐ अद्यामुकगोत्राया-मातुरमुकप्रेताया-अर्घपात्रोदकं-अमुकगोत्रस्यस्वभर्तु-रर्घपात्रोदकेन संयोजयिष्ये, भनेर उक्त पात्र लिएर पहिले कहिएका मन्त्रहरू पढेर पित्र्यर्घ पात्रमा रहेको तृतीयभागको जल, चन्दनयुक्त पितामहको पात्रमा रहेको जल मिलाई संकल्प गर्नु- अमुक गोत्रे

मातरमुकप्रेते अमुकगोत्रेण स्वभर्त्रासह सायुज्यं गच्छेति, भन्नु यस्तै प्रकारले पितृपिण्ड पनि जोडे पछि यो संङ्कल्प गर्नु- ॐ अद्यामुकगोत्राया मातुरमुकप्रेतायाः पिण्डं स्वभर्तृपिण्डेन संयोजयिष्ये भनेर मातृपिण्ड लिएर माथि कहिएको मन्त्र पढी संकल्प गर्नु - ॐ अमुकगोत्रे मातुरमुकप्रेते अमुकगोत्रेण स्वभर्त्रामुकशर्मणा संसृजस्वेति ।। पितृपिण्ड-प्रथमभागयुक्ते पितामहपिण्डे संयोज्य दधिमधुभ्यां मिश्रीकृत्य वर्तुलं कुर्यात्।। मातृश्राद्धमा दक्षिणावाक्य अलग गर्नु । त्यही नै सव्य भएर कुश-तिल-दक्षिणाद्रव्यलिएर संकल्प गर्नु- ॐ अद्यामुकगोत्रायाः अस्मत्मातुरमुकदेब्याः कृतैतत् सपिण्डीकरणश्राद्धप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे ।। इति विशेषः।। सहगमनाभावे मातृसपिण्डीकरणे पितामह्यादि पिण्डत्रये

मातृपिण्डं संयोजयेत् ।। मृतमातृको मात्रादि पिण्डत्रये पत्न्या पिण्डं संयोजयेत्।। अमृतमातृकस्तु पितामह्यादि पिण्डत्रये पत्न्याः पिण्डं संयोजयेदिति सपिण्डीकरणम् ।।

अथ सपिण्डोत्तरपाथेयश्राद्धम्

सपिण्डीकरण गरिसके पछि वा बाह्रौं दिनमा फेरि पाथेयश्राद्ध गर्नु । सो विधि पार्वण वा एकोद्दिष्टको विधिले सिद्धान्न वा आमान्नले गर्नु। कर्ताले स्नान गरी पहिले जस्तै बत्ती स्थापन गरी बाल्नु, सर्स्यूं वा तिलहरू श्राद्धस्थल वरि-परि छर्कनु । त्यसपछि पूर्वाभिमुख भई तल लेखिएका उपचार विधिले कर्मपात्र गराउनु- ॐ यद्देवा देवहेडनमित्यादि तीन मन्त्रले कर्मपात्र बनाउनु । ॐ पवित्रेस्थो यो मन्त्रले पवित्रम् ।। ॐ शन्नोदेवीले जल ।। ॐ तिलोऽसीले तिल ।।

ॐ श्रीश्चते मन्त्रले फूलहरू ।। ॐ यवोसीति मन्त्रले जौहरू कर्मपात्रमा राख्नु कर्मपात्रमा रहेको कुशको जलले । ॐ अपवित्रः पवित्रोवेत्यादि पढेर पुण्डरीकाक्षः पुनातु भनेर आफू र श्राद्धस्थल वरिपरि सेचन गर्नु। त्यसपछि कुशादि लिएर सङ्कल्प भन्नु - ॐ अद्येहेत्यादि (देशकालादि संझी) अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः प्रेतलोकात् पितृलोकगमने सुखसिद्ध्यर्थं पाथेयश्राद्धं सांवत्सरिकैकोद्दिष्टश्राद्धविधिनाऽहं करिष्ये भनेर संकल्प गर्नु। यहांको वाक्यमा पाथेयपदप्रक्षेप भन्ने शब्द जोड्नु त्यसपछि 'देवताभ्यः' इत्यादि मंत्र तीन पटक पढ्नु। त्यसपछि अपसव्य भएर दक्षिणाभिमुख हुनु र बायाँ घुँडोले भूमिमा छोई मोटकादि लिएर संकल्प भन्नु - ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः पाथेयश्राद्धे इदमासनं ते स्वधा ।। भनेर छोडिदिनु, त्यसपछि एउटा

दुनोमा निम्न मंत्रहरूले त्यही त्यही सामग्री राख्नु पवित्र-- ॐ पवित्रेस्थो०' ॐ शन्नो देवी भन्ने मन्त्रले जल ॐ तिलोसी यो मन्त्रले तिल ।। ॐ गन्धद्वारां भन्ने मन्त्रले चन्दन ॐ श्रीश्चते यो मन्त्रले फूलहरू राख्नु त्यसपछि त्यो अर्घपात्र बायाँ हातमा राखि फूलसहितको कुश ॐ नमोनारायणाय, भनेर राखिदिनु सो जललाई ॐ या दिव्या आपः इत्यादि मन्त्रले मन्त्रित् गरी मोटक लिएर सङ्कल्प भन्नु- अद्यामुक गोत्रामुकशर्मन् पाथेयश्राद्धे एष हस्तार्घस्ते स्वधा भनेर छोडिदिनु। त्यसपछि पवित्रसहितको अर्घपात्र आफू बसेको बायाँ भाग वा कुशका ब्राह्मणको पछिल्तिर लगी ॐ पित्रे स्थानमसी, भनेर दुनो घोप्ट्याइदिनु । त्यो दुनोमाथि तीन ओटा कुशको टुक्रा राखिदिनु । त्यसपछि चन्दन, फूल, अक्षतादिले ब्राह्मणको पूजा गरी मोटक आदि लिएर संकल्प

गर्नु- ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन् पाथेयश्राद्धे एतानि गन्ध-पुष्पाक्षतधूपदीपपूगीफलद्रव्यवासांसि ते स्वधा भनेर छाडिदिनु । तत आसनसहितस्यान्नपात्रस्य चतुर्दिक्षु चतुरस्रं मण्डलं विधाय श्राद्धीयान्नाग्र-भागतिलघृतमधुजलयुतमादाय मोटकादीन्यादाय इदमामान्नं सजलमेतद् भूस्वामिपितृभ्यो नमः इत्युत्सृजेत् ।। ततो व्यंजनसहिततिलघृतमधुजल-युतमन्नमुपनीय मधुनाऽभिघार्य अधोमुखाभ्यां व्यस्ताभ्यां पाणिभ्यामन्नपात्र-मालभ्य पृथ्वी ते इत्यादि देखि जुहोमी सम्म र इदं विष्णुरित्यादि देखि सुरेस्वाहा सम्मका मन्त्रहरू पढेर ।। ॐ अपहता असुरेत्यादि मन्त्रले तिलहरू वरिपरि छर्नु त्यसपछि ॐ इदमन्नम् ।। ॐ इमा आपः।। ॐ इदमाज्यम् ।। ॐ इदं हविरिति पुनरन्ने। क्रमैले अन्न, जल, घिउ, आदि ब्राह्मणलाई देखाएको भावनागरी बायां हातका औंलाहरूले

क्रमशः ती-ती वस्तुहरू छोएर र दायाँ हातले मोटक लिएर ती वस्तुहरू छुनु, सङ्कल्प यस प्रकार छ- ॐ अद्यामुकगोत्रायास्मत्पित्रेऽ-मुकशर्मणे इदमन्नं सजलं सोपस्करणं ते स्वधा, भनेर छाडिदिनु । त्यसपछि सव्य भएर निम्न मन्त्रहरू पढ्नु - मधु व्वातेत्यादि ऋचं पठेत् ।। ॐ मधु मधु मधु इति अन्नहीनं इत्यादि मन्त्रहरू पढिसकेपछि अन्न पात्र नगिचै दक्षिण तर्फ भूइमा कुश राखी विकिरासन दिनु र मोटक लिएर यो श्लोक भन्नु- असंस्कृतप्रमीतानां त्यागिनां कुलयो-षिताम् ।। उच्छिष्टभागधेयानां दर्भेषु विकिरासनम् ।। ततः सतिल-घृतमधुजलयुतमन्नमादाय जलेनाऽऽप्लाव्य मोटकादीन्यादाय ।। अग्नि-दग्धाश्च ये जीवा येप्यदग्धा कुले मम ।। भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम् इत्युत्सृजेत् ।। कुशान्परित्यज्य सव्येन हस्तौ पादौ

प्राक्षाल्याऽऽचम्य विष्णुं स्मरेत् ।। मधुवातेति ऋचं पठेत् गायत्रीं स्मरेत् ।। ततोऽऽपसव्येन अन्नपात्रसमीपे पिण्डदानार्थं मृत्पिण्डिकां विधाय तदुपरि दर्भपिञ्जुलीं गृहीत्वा ॐ अपहता असुरा रक्षा इत्यादि मन्त्रले दक्षिणतर्फबाट रेखा खिच्नु । उत्तरतिर फ्यांक्नु । त्यसपछि रेखामाथि निम्न मन्त्र 'ये रूपानि प्रतिमुञ्च०' पढी अंगार घुमाउनु र सो अंगार दक्षिणतिर फ्यांकिदिनु । अनि वेदिकामा मूल नकाटिएको (जरो सहितको) कुश बिछ्याई सव्यभएर ॐ देवताभ्यः० इत्यादि मन्त्र बढ्नु । अपसव्य भएर मोटक लिनु र सङ्कल्प भन्नु- ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन् पाथेयश्राद्धे पिण्डस्थाने इदमवनेजनं ते स्वधा, भनेर कुशमाथि आसन दिनु । त्यसपछि तिल, घिउ, महयुक्त भएको पिण्ड बनाएर पछि पिण्ड सहित जल, तिल, मोटक लिएर

सङ्कल्प भन्नु - ॐ अद्यामुकगोत्राऽस्मत्पितरमुकशर्मन् पाथेयश्राद्धे एष पिण्डोऽमृतस्वरूपो अक्षय्यतृप्तिहेतोस्ते स्वधा, भनेर अवनेजनमाथि पिण्ड दिनु ।। आस्तृतकुशमूलले 'लेपभागभुजस्तृप्यन्तु' पुच्छनु र सव्य भएर आचमन गर्नु । अनि चन्दन, फूल, आदि लिएर पितृलाई संझदै यो मन्त्र पढनु - ॐ अत्र पितरो मादयध्वं यथाभागमावृषायध्वम्, भनेर उत्तराभिमूख भई श्वास रोकेर सूर्यको ध्यान गरी अपसव्य भएर चढाउनु - ॐ अमीमदन्त पितर०' यो मन्त्रले पिण्डमा फूल, चन्दनादि चढाए पछि मोटक लिएर सङ्कल्प गर्नु- ॐ अद्यामुकगोत्राऽस्मपत्पितर-मुकशर्मन् पाथेय श्राद्धपिण्डे इदं प्रत्यवनेजनं ते स्वधा भनेर प्रत्यवनेजन पिण्ड माथि दिनु । त्यसपछि ॐ नमो वः पितर० यो मन्त्र पढेर पिण्डमाथि सूत्र चढाउनु ।।गन्ध-पुष्पआदिले पूजा गरेर धूप-दीप पनि

गर्नु।। मोटक लिएर ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन् पाथेयश्राद्धपिण्डे एतानि सूत्रगंधपुष्पाक्षतधूपदीपैक्षवादि नैवेद्यानि ते स्वधा, भनेर चन्दन आदि चढाउनु ।। ततः ॐ शिवा आपः सन्तु इति जलम् ।। ॐ सौमनस्यमस्तु इति पुष्पम् ।। ॐ अक्षतञ्चारिष्टमस्तु इति तण्डुलान् अन्नपात्रोपरि क्षिपेत् ।। सव्यं कृत्वा कर्मपात्रोदकं कुशैर्गृहीत्वा प्रतिमन्त्रं स्वशिरस्यभिषिंचेत् ।। ॐ अस्मत्कुले दीर्घमायुरस्तु ।। ॐ शान्तिरस्तु।। ॐ पुष्टिरस्तु ।। ॐ वृद्धिरस्तु ।। ॐ यच्छ्रेयस्तदस्तु ।। ॐ यत्पापं तत्प्रतिहतमस्तु इति भूमौ ।। ॐ द्विपदेचतुष्पदेभ्यः शान्तिरस्तु इति अभिषिञ्चेत् ।। ततः अपसव्येन मोटकादीन्यादाय ॐ अद्यामुक-गोत्रस्यास्मत्पितुरमुकशर्मणः पाथेयश्राद्धे दत्तैतदन्नपानादिकमक्षय्यमस्तु भनेर अक्षय्योदक दिनु र सव्य भएर दक्षिण दिशा हेर्दै ॐ अघोरः

पिताऽस्तु भनेर पूर्वाग्र गरी जलधारा दिनु । त्यसपछि सव्यले नै पूर्वमुख गरी आशिष प्रार्थना गर्नु- गोत्रन्नो वर्द्धन्ताम् ।। वर्द्धन्ताम् इति प्रतिवचनम् ।। ॐ दातारो नोभिवर्द्धन्ताम् ।। ॐ वर्द्धन्तामिति प्रतिवचनम् ।। ॐ वेदाः सन्तु ।। ॐ सन्त्विति प्रतिवचनम् ।। ॐ संततिरस्तु ।। ॐ संत्विति प्रतिवचनम् ।। श्रद्धा च नो मा व्यगमत् ।। ॐ मागात् इति प्रतिवचनम् ।। ॐ बहुदेयं च नोऽस्तु ।। ॐ अस्त्विति प्रतिवचनम् ।। ॐ अन्नं च नो बहु भवेत् ।। ॐ भवतु ।। ॐ अतिथींश्च लभेमहि ।। ॐ लभध्वम् ।। याचितारश्च नः सन्तु ।। ॐ सन्त्विति प्रतिवचनम्।। ॐ मा याचिष्म कञ्चन ।। ॐ मा याचेथा इति प्रतिवचनम् ।। ॐ एताः सत्याशिषः सन्तु ।। ॐ संत्विति प्रतिवचनम्।।

त्यसपछि श्राद्धकर्ताले कुशका ब्राह्मणका हातबाट तिलक लगाउनु।

त्यसपछि अपसव्य भएर पिण्डमाथि पवित्रसहितको कुश राखिएको जल चढाउनु । अनि ॐ ऊर्ज्जम्वहन्तीत्यादि मन्त्र पढी दक्षिणतर्फ धारो पारी पिण्डमा दूध चढाउनु र सव्य भएर नम्र हुँदै पिण्ड सुँघ्नु । अपसव्यले पिण्ड उठाउनु पिण्डाधारमा राखिएको कुश र अगुल्ठो अग्निमा राख्नु । सव्य भएर पिण्डिकामा शङ्ख र चक्र लेख्नु ।। पूजा गर्नू- ॐ शङ्खाय नमः।। ॐ चक्राय नमः।। ॐ शङ्खचक्रा-भ्यां नमः। अपसव्य भएर मौन बनी पिण्ड पिण्डिकामाथि राखी सव्यले ॐ वसन्ताय इत्यादि मन्त्रले पूजन गर्नु। त्यसपछि अपसव्य भएर अर्घपात्र उत्तानो गराउनु । सव्यले दक्षिणाद्रव्य र कुशादि लिएर सङ्कल्प गर्नु- अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः कृतैतत्पाथेयश्राद्धप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतं तन्निष्क्रयद्रव्यं वा यथानामदैवतं यथानामगोत्राय यथानाम-

शर्मणे ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे' भनेर दक्षिणा दिनु, त्यस पछि अपसव्य भएर ॐ वाजे वाजे० यो मन्त्रले पितृविसर्जन गर्नु।। ततः सव्येन ॐ देवताभ्यः इति त्रिः पठेत् ।। अपसव्येन दीपाच्छादनं विधाय । सव्येन हस्तौ पादौ प्रक्षाल्याऽऽचम्य प्रमादादिति पठित्वा विष्णुं स्मरेत् ।। श्राद्धीयवस्तूनि ब्राह्मणाय प्रतिपादयेत् ।। इति पाथेयश्राद्धं सम्पूर्णम् ।।

अथ पञ्चकमरणविधिः

गरुड़पुराणे- आदौ कृत्वा धनिष्ठार्द्धमेतन्नक्षत्रपञ्चकम् ।। रेवत्यन्तं सदा दुष्यं न शुभं सर्वदा भवेत् ।। दाहस्तत्र न कर्त्तव्यो विषादः सर्वजन्तुषु । न दीयते जलं तत्र ह्यशुभं सर्वदा भवेत् ।। पञ्चकानन्तरं कार्यं कर्त्तव्यं सर्वमन्यथा।। पुत्राणां गोत्रिणां तस्य सन्तापो ह्युपजायते।

गृहे हानिर्भवेत् तस्य ऋक्षेष्वेषु मृतस्तु यः।। ब्रह्मपुराणे - कुम्भमीनस्थिते चन्द्रे मरणं यस्य जायते।। न तस्योर्ध्वगतिर्दृष्टा सन्ततौ न शुभं भवेत् । न तस्य दाहः कर्त्तव्यो विनाशः स्वेषु जन्तुषु । पञ्चकानन्तरं सर्वं कार्यं दाहादिकं खलु ।। अथवा तद्दिने कार्यो दाहस्तु विधिपूर्वकः ।। धनिष्ठापञ्चके जीवो मृतो यदि कथंचन ।। त्रिपुष्करे याम्यभे च कुलजान्मारयेद् ध्रुवम् ।। तत्रानिष्टविनाशार्थं विधानं समुदीर्यते ।। दाहदेशं शवं नीत्वा स्नापयेच्च प्रयत्नतः ।। दर्भाणां प्रतिमाः कार्या पञ्चोर्णासूत्रवेष्टिताः।। यवपिष्टेनानुलिप्तास्ताभिः सह शवं दहेत् ।। प्रेतवाहः प्रेतसखः प्रेतपः प्रेतभूमिपः ।। प्रेतहर्ता पञ्चमस्तु नामान्येतानि च क्रमात् ।। सूतकान्ते ततः पुत्रः कुर्याच्छान्तिकपौष्टिकम् ।। कांस्यपात्र-स्थितं तैलं वीक्ष्य दद्याद् द्विजन्मने ।। ब्रह्मविष्णुमहेशेन्द्रवरुणप्रीतये ततः।। माषमुद्गयवव्रीहिप्रीयंग्वादि प्रयच्छति।। स्वर्णदानं रुद्रजाप्यं

लक्षहोमो द्विजार्चनम् ।। गोभूदानं षडंशेन कुर्याद्दोषोपशान्तये।। इति पंचकमरणविधिः।।

धनिष्ठाको उत्तरार्द्धबाट रेवतीको अन्तिम पाउसम्म 'पञ्चक' भनिन्छ ।
यस अवधिमा मृत्यु हुनाले मृतक मृतकका परिवारलाई समेत अनिष्ट हुने भएकोले शवदाहका समयमा र चोखिने दिन विषेश विधिद्वारा कर्म गर्नुपर्छ ।

अथ पञ्चकमरणप्रयोगः

कर्ता सव्य भई पूर्वाभिमुख हुने र कुश-तिल-जल आदि लिएर- अद्येहेत्यादि अमुकगोत्रस्यामुकप्रेतस्य धनिष्ठादिपंचकमरणविधिं करिष्ये, भनेर संकल्प गर्नु र चन्दन, माला आदिले पाँच ओटा कुशको प्रतिमालाई सिंगारी ऊनले बेह्री जौको पीठोले लेपन गरी शव दाहको समयमा प्रेतमाथि यसरी राख्नु- प्रेतवाह प्रतिमां शिरसि ।। प्रेतसखप्रतिमां नेत्रयोः, प्रेतप्रतिमां बाहुकुक्षौ ।। प्रेतभूमिपप्रतिमां नाभौ।। प्रेतहर्तुप्रतिमां

पादयोः।। ती पाँचओटा कुशको प्रतिमा (पुतला) लाई तल लेखिएका मन्त्रहरू पढी घिउको आहुति दिनु । यमाय सोमं मधुमत्तयेषां ते नो गावः स्वदन्तु हव्या ।। दूतं वा देवः स्वदममुमेषा ते नो रासत मुरुगाय मद्या यूयं पातःस्वस्तिभिः सदा नः।। त्र्यम्बकं यजामहे सुगन्धिम्पुष्टि-वर्द्धनम् ।। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात्' भनेर ती प्रतिमाहरू प्रत्येकमा एक-एक पटक घिउको आहुती दिनु र पञ्चोदकको धारा दिएर शवदाह गर्नु । इति पञ्चकमरणदाहविधिः।।

अथ मासिकश्राद्धविधिः

आद्यमासिकश्राद्धमा सान्नोदककुम्भोत्सर्गान्नसंकल्पविधिः।। गाईको गोबरले लिपिएको भूमिमा पूर्वमुख गरी बस्नु र बत्ती जलाई आचमन

गर्नु र 'ब्राह्मणाय नमः' भनेर ब्राह्मणलाई पूजा गरी दक्षिण फर्कनु र अपसव्य भई यो सङ्कल्प भन्नु ।। ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः अद्य कर्त्तव्यामुकमासिकश्राद्धे अनेन ताम्बूलगंधपुष्पाक्षतेन त्वं मया निमन्त्रितः ।। ॐ निमन्त्रितोऽस्मीति प्रतिवचनम् ।। अक्रोधनै इत्यादि मन्त्र पढ्नु र ॐ नमोस्त्वनन्ताय इत्यादि मन्त्रले ब्राह्मणको पाउ धुनु । त्यसपछि जल रहेको दुनो बायाँ हातमा लिई मोटक लिई त्यो दुनो छुनु- ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन्नेष पादार्घस्ते स्वधा।। सव्य भई आचमन गर्नु र घरमा प्रवेश गराएको भावना गरी फेरि अपसव्य हुनु र यो शब्द भन्नु - ॐ आगता यूयं ॐ सुस्वागता वयं ।। ॐ इदमासनमास्यताम्।। ॐ आस्यते प्रतिवचनम् ।। ब्रह्मणलाई उत्तरमुख गरी स्थापना गर्नु । अनि ॐ कर्मपात्रमहं करिष्ये ।। ॐ कुरुष्वेति

प्रतिवचनम् ।। ॐ यद्देवादेवहेडनं इत्यादि मन्त्रले कर्मपात्र स्थापन गर्नु।। ॐ शन्नो देवीति जलम् ।। ॐ पवित्रेस्थ इति कुशान् ।। ॐ गंधद्वारामिति गन्धम् ।। ॐ अक्षन्नमीमदन्तेत्यक्षता: ।। ॐ तिलोसीति भनेर तिलहरू राख्नु । सव्य भई कर्मपात्रमा रहेको तीन ओटा कुश र जलसहितले अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।। यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ।। पुण्डरीकाक्षः पुनातु भनेर आफू र श्राद्ध स्थल वरिपरि सेचन गर्नु । त्यसपछि कुशादि लिएर यो सङ्कल्प भन्नु- अद्येत्यादि पूर्वसंकल्पसिद्धिरस्तु अमुक मासिक सान्नोदककुम्भोपस्थितिस्वगताश्वमेध-यज्ञजन्यफलसमफलप्राप्तिका-मोऽमुकगोत्रस्यास्मत्पितुर-मुकशर्मणः सान्नोदककुम्भोत्सर्गान्नसंकल्पादि-कामुक मासिकश्राद्धमेभिर्द्रव्यैरहं करिष्ये भनेर प्रतिज्ञा गर्नु र ॐ

देवताभ्यः इत्यादि मन्त्र तीन पटक भन्नु । त्यसपछि दक्षिणाभिमुख भई सान्नोदक कुम्भ अगाडि राखी कुश लिई सङ्कल्प भन्नु - ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मण अमुकमासिकश्राद्धे इदमासनं तुभ्यं स्वधा भनेर कुम्भासनको नगीचै छाड्नु । त्यसपछि चन्दन, अक्षता, धूप, दीप, नैवेद्य, वस्त्र, द्रव्य आदिले ब्राह्मण र कुम्भको पूजा गरी मोटकादि लिएर ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन् एतानि गंधपुष्पाक्षतधूपदीपैक्षवादि नैवेद्यताम्बूलवसद्रव्यपूगीफलयज्ञोपवीतादीनि तुभ्यं स्वधा, भनेर कुम्भको नगीचै छाड्नु । अनि चन्दन लिई ॐ गन्धद्वारान् इत्यादि मन्त्र पढी कुशको ब्राह्मणलाई तिलक लगाइदिनु । र मोटकादि लिएर सान्नोदक कुंभ छुनु - ॐ अद्यामुकगोत्रायास्मत्पित्रेऽमुकशर्मणे अयं सान्नोदककुंभस्तुभ्यं स्वधा भनेर कुशका ब्राह्मणका हातमा छोड्नु।

अथ भूस्वामी-घिउ, मह, जल सहितको अन्नमा मोटकादि लिएर छुनु - ॐ इदमामान्नं सजलमेतद्भूस्वामिपितृभ्यो नमः।। अथ अन्नसंकल्पः।। सबै परिकारले युक्त तिल, चीनि, जल सहितको अन्नलाई दुई हातले ढाकी विनम्र भावले अधोमुख गरी सो सिधा-अन्नपात्रलाई छोई निम्न मन्त्र पढ्नु - ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा । ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।। समूढमस्य पांसुरे स्वाहा भनेर।। ॐ इदमन्नं । ॐ इमा आपः।। ॐ इदमाज्यं ।। ॐ इदं हविः।। ॐ एतान्युप करणानि० अन्न, जल आदि ब्राह्मणको दाहिने औंला समाएर सुम्पिएको भावना गर्नु । ॐ अपहता असुरारक्षासिवेदिषद भनेर अन्न वरिपरि तिलहरू छर्नु । त्यसपछि मोटकादि लिएर अद्यामुकगोत्रायास्मत्पित्रे ऽमुकशर्मणे इदमन्नं

सजलं सोपस्करं परिविष्ठं परिवेष्यमाणमक्षय्यतृप्तिहेतोस्ते स्वधा भनेर मोटक भैंमा छोड्नु र ॐ अन्नसंकल्पसिद्धिरस्तु भवान्प्राशयतु भनेर आपोशन (जल) दिनु अनि सव्य भएर अञ्जलि जोरी सप्तव्याधा०' इत्यादि मन्त्रहरू पढ्नु - ॐ मधु० वातेति ऋचं ।। ॐ मधु ३ अन्नहीनं इत्यादि मन्त्रहरू पढी अपसव्य भएर ब्राह्मणका हातमा ॐ शिवा आपः सन्तु इति जलम् ॐ सौमनस्यमस्तु इति पुष्पम् ।। अक्षतं चारिष्टमस्तु भनेर चामलका अक्षताहरू चढाउनु र सव्य भई पूर्वाभिमुख हुनु र तलको मंत्र पढ्नु - ॐ अपां मध्ये स्थिताः देवाः सर्वमप्सु प्रतिष्ठितम् ।। ब्राह्मणस्य करे न्यस्तां शिवा आपो भवन्तु मे ।।१।। लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे ।। लक्ष्मीर्वसति गोष्ठेषु सौमनस्यं ददातु मे । अक्षतञ्चास्तु मे पुण्यं शान्तिः पुष्टिर्धृतिस्तथा ।। यद्यच्छ्रेयस्करं

लोके तत्तदस्तु सदा मम ।। त्यसपछि कर्मपात्रको जल र कुश लिएर प्रत्येक मन्त्रले आफ्नो शिरमा सेचन गर्नु- ॐ अस्मत्कुले दीर्घमायुरस्तु।। ॐ शान्तिरस्तु !! ॐ पुष्टिरस्तु ॐ वृद्धिरस्तु ।। ॐ यच्छ्रेयस्तदस्तु ॐ यत्पापं तत्प्रतिहतमस्तु भनेर भूमिमा र ॐ द्विपदेचतुष्पदेभ्यः शान्तिर्भवतु।। यं कामं कामयते सोऽस्मै कामः समृद्ध्यताम्।। अनि निम्न मन्त्र पढी ब्राह्मणका हातबाट आफूले चन्दन लगाउनु त्यसपछि दक्षिणाको लागि तिल, कुश, जौ, जल, द्रव्य आदि लिएर- ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः कृतैतत्सान्नोदककुम्भोत्सर्गान्न-संकल्पादिकरूपममुक-मासिकश्राद्धप्रतिष्ठासाङ्गतासिध्यर्थमिमां दक्षिणां रजतं चन्द्रदैवतं यथानाम-गोत्राय यथानामशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं सम्प्रददे ।। ॐ स्वस्ति इति प्रतिवचनम् ।। त्यसपछि अपसव्य

भएर बत्ती ढाकिदिनु र सव्य भएर हात पाउ धोई आचमन गर्नु र यो मन्त्र पढ्नु - ॐ यत्कृतं तत्सुकृतमस्तु, यन्न कृतं तद्विष्णोः प्रसादाद् ब्राह्मणवचनात्सर्वं परिपूर्णमस्तु।। ॐ अस्तु परिपूर्णम् ।। ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेत्ताऽध्वरेषु च।। स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः।। ततो विष्णुस्मरणम्।। त्यसपछि विष्णुको ध्यान गर्दै-ब्राह्मण विसर्जन गर्नु र स्वस्ति भन्नु । अनि कर्मपात्रको जलले परिक्रमा गर्नु- कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृति-स्वभावात्।। करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयामि । त्यसपछि ब्राह्मणद्वारा मन्त्र पढ्दै आशिष माग्नु र ब्राह्मणलाई भोजन गराउनु र आफूले पनि शुद्ध हविष्यान्न भोजन गर्नु ।

इति संक्षेपतो मासिकश्राद्धविधिः समाप्तः ।।

समाप्तेयं अन्त्यपद्धतिः

०००

मध्यमषोडशीश्राद्धस्य कर्तव्यता

मलिनं षोडशं चैतत् प्रथमं परिकीर्तितम् ।
अन्यच्च षोडशं मध्ये द्वितीयं कथयामि ते ।।
प्रथमं विष्णवे दद्याद् द्वितीयं श्रीशिवाय च ।
याम्याय परिवाराय तृतीयं पिण्डमुत्सृजेत् ।।
चतुर्थं सोमराजाय हव्यवाहाय पञ्चमम् ।
कव्यवाहाय षष्ठञ्च दद्यात् कालाय सप्तमम् ।।
रुद्राय चाष्टमं दद्यान्नवमं पुरुषाय च ।
प्रेताय दशमं चैवैकादशं विष्णवे ततः ।।
द्वादशं ब्रह्मणे दद्याद् विष्णवे च त्रयोदशम् ।
चतुर्दशं शंभवे तु यमाय दशपञ्चकम् ।।

तत्पुरुषाय पक्षीश ! षोडशं पिण्डमुत्सृजेत् ।
मध्यं षोडशकं प्राहुरेतत् तत्त्वविदो जनाः ।।
द्वादश प्रतिमासेषु पाक्षिकं च त्रिपाक्षिकम् ।
न्यूनषाण्मासिकं पिण्डं दद्यान्न्यूनाब्दिकं तथा ।।
उत्तमं षोडशं चैतन्मया ते परिकीर्तितम् ।
श्रपयित्वा चरुं तार्क्ष्य ! कुर्यादेकादशेऽहनि ।।
चत्वारिंशत्तथैवाष्टौ श्राद्धं प्रेतत्वनाशनम् ।
यस्य जातं विधानेन स भवेत्पितृपङ्क्तिभाक् ।।
पितृपङ्क्तिप्रवेशार्थं कारयेत् षोडशत्रयम् ।
एतच्छ्राद्धविहीनश्चेत् प्रेतो भवति सुस्थिरम् ।।
यावन्न दीयते श्राद्धं षोडशत्रयसंज्ञकम् ।
स्वदत्तं परदत्तं च तावन्नैवोपतिष्ठति ।।

(गरुडपुराणस्य द्वादशाध्यायादुद्धृतानि पद्यानि)

एकादशाहकृत्यमध्यमषोडशीश्राद्धविधिः

विधिनिरूपण

सर्वप्रथम कर्ताले स्नान सङ्कल्प पढी जौ, तिल र कुशसहित स्नान गर्नुपर्दछ । शुद्ध वस्त्र धारण गरी गाईको गोबरले लिपेको श्राद्ध गर्ने स्थानमा बसेर आचमन गरी पवित्र धारण गर्नुपर्दछ। कर्मपात्रका मन्त्र पढी कर्मपात्र तैयार गर्नुपर्दछ । तिलको तेल अथवा गाईको घिउमा बत्ती बालेर बत्तीको पूजा गरी जौ र फूलले भूमिको पूजा गर्नुपर्दछ ।

विशेष

मध्यमषोडशीका १६ वटा पात्रब्राह्मण स्थापना गर्दा विष्णु, शिव, यम आदि १४ को एक पङ्क्तिमा स्थापना गरी दशौं प्रेत र सोह्रौं तत्पुरुषको अलग स्थापना गर्नुपर्छ । विष्णु आदि देवताका निमित्त कुश, जौ र जलको प्रयोग हुन्छ भने प्रेत र तत्पुरुषको निमित्त कुश, तिल र जलको प्रयोग हुन्छ ।

स्नानसङ्कल्पः- **अद्यामुकगोत्रस्यामुकप्रेतस्य प्रेतत्वनिवृत्तये सद्गतिप्राप्तये च मध्यमषोडशीश्राद्धनिमित्तं स्नानमहं करिष्ये** । इति सङ्कल्पः।

पवित्रीकरणम् - यवतिलकुशसहितं स्नात्वा धौते वाससी परिधाय गोमयोपलिप्तं श्राद्धदेशमागत्य उपविश्य आचम्य कुशपवित्रधारणं कृत्वा देवकर्मपात्रं कुशासनोपरि स्थापयित्वा तत्र कुशजलतिलयवगन्धपुष्पाक्षतादीन् तत्तन्मन्त्रैर्निक्षिप्य तत्रस्थकुशखण्डत्रयसहितजलेन -

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यःस्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ।।

पुण्डरीकाक्षः पुनातु - इत्युक्त्वा स्वात्मानं श्राद्धीयवस्तूनि च सिञ्चेत्।

दीपपूजनम् - ततस्तिलतैलेन गोघृतेन वा दीपं प्रज्वाल्य दीपं पूजयेत्।

भूमिपूजनम् - यवपुष्पैः ॐ भूम्यै नमः इति भूमिं पूजयेत् ।

पात्रब्राह्मणस्थानम् - श्राद्धस्थले षोडशपात्रब्राह्मणानां स्थापनं कार्यम् । मध्ये दशमषोडशयोः पृथक् पृथक् स्थापनं कार्यम् ।

विधिनिरूपण

पात्रब्राह्मणहरूको स्थापनापछि कुश, जौ र जल लिएर प्रतिज्ञा सङ्कल्प गरी देवताभ्यः० ३ पटक पढ्नुपर्दछ । नमो नमस्तेदेखि अनन्तकः सम्मका श्लोकहरू पढेर पूर्वादि दिशामा सर्स्यूं छर्कनुपर्दछ ।

विशेष - स्त्री जाति भए गोत्रायाः, प्रेतायाः भन्नुपर्छ ।

प्रतिज्ञासङ्कल्पः - कुशयवजलान्यादाय- ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य प्रेतत्वनिवृत्तिपूर्वक-सद्गतिनिवारणार्थमुत्तमलोकप्राप्त्यर्थं मध्यमषोडशीश्राद्धं तन्त्रेणाऽहं करिष्ये । इति।

देवपितृप्रार्थना

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ।

इति त्रिर्जपेत् । गौरसर्षपान् पूर्वादिदिक्षु विकिरेत् -

ॐ नमो नमस्ते गोविन्द पुराणपुरुषोत्तम ।
इदं श्राद्धं हृषीकेश रक्षतां सर्वतोदिशः ।।१।।
पूर्वे नारायणः पातु वारिजाक्षस्तु दक्षिणे ।
प्रद्युम्नः पश्चिमे पातु वासुदेवस्तथोत्तरे ।।२।।
ऐशान्यां रक्षतां विष्णुराग्नेय्यां च त्रिविक्रमः ।
नैर्ऋत्यां पद्मनाभस्तु वायव्ये पातु माधवः ।।३।।
ऊर्ध्वं गोवर्द्धनो रक्षेदधस्ताच्च ह्यनन्तकः ।

आवाहनम्

विधिनिरूपण

सव्य जनैले तलका मन्त्र पढी जौ, फूल, चन्दन, विष्णु आदि देवतालाई चढाउनुपर्दछ । अपसव्यले दशौं र सोह्रौंलाई तिल, कुश, जल चढाउनुपर्दछ।

१. **विष्णोरावाहनम्**

ॐ इदं विष्णुर्विचक्रमे त्रेधा निर्दधे पदम् ।

समूढमस्य पांᳫँसुरे स्वाहा ।।

भूर्भुवः स्वः विष्णो इहागच्छ इह तिष्ठ विष्णवे नमः, विष्णु- मावाहयामि।

२. **शिवस्यावाहनम्**

ॐ त्र्यंम्बकं यजामहे सुगन्धिं पुंष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्।

शिव इहागच्छ इह तिष्ठ शिवाय नमः, शिवमावाहयामि ।

३. **यमस्यावाहनम्**

ॐ यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे । देवस्त्वा सविता मर्ध्वानक्तु ।

पृथिव्या: सᳬस्पृशस्पाहि । अर्चिरसि शोचिरसि तपोऽसि ।।

यम इहागच्छ इह तिष्ठ यमाय नम:, यममावाहयामि ।

४. **सोमराजस्यावाहनम्**

ॐ इमं देवा असपत्नᳬसुवध्वं महते क्षत्राय महते ज्यैष्ठ्यांय महते जानराज्यायेन्द्र-स्येन्द्रियाय। इमममुष्य पुत्रममुष्यै पुत्रमस्यै विश ऽएष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानाᳬराजा ।।

सोमराज इहागच्छ इह तिष्ठ सोमाय नम:, सोमराजमावाहयामि ।

५. **हव्यवाहस्यावाहनम्**

ॐ अग्निं दूतं पुरो दधे हव्यवाहुमुप ब्रुवे ।। देवा २।। ऽआसादयादिह।।

हव्यवाह इहागच्छ इह तिष्ठ हव्यवाहाय नम:, हव्यवाहमावाहयामि।

६. **कव्यवाहस्यावाहनम्**

ॐ अग्निं दूतं पुरो दधे हव्यवाहुमुप ब्रुवे ।। देवा २।। ऽआसादयादिह।।

कव्यवाह इहागच्छ इह तिष्ठ कव्यवाहाय नम:, कव्यवाहमावाहयामि।

७. **कालस्यावाहनम्**

ॐ कार्षिरसि समुद्रस्य त्वाक्षित्या ऽउन्नयामि । समापोऽआद्भिरग्मत समोषधीभिरोषधी:।।

काल इहागच्छ इह तिष्ठ कालाय नमः, कालमावाहयामि ।

८. **रुद्रस्यावाहनम्**

ॐ त्र्यंम्बकं यजामहे सुगन्धिं पतिवेदनम् । उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः ।।

रुद्र इहागच्छ इह तिष्ठ रुद्राय नमः, रुद्रमावाहयामि ।

९. **पुरुषस्यावाहनम्**

ॐ पुरुष ऽएवेदꣳसर्वं यद्भूतं यच्च भाव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति।।

पुरुष इहागच्छ इह तिष्ठ पुरुषाय नमः, पुरुषमावाहयामि ।

१०. **प्रेतस्यावाहनम्**

अपसव्येन - तिलजलपुष्पचन्दनमादाय

ॐ प्रेता जयता नर ऽइन्द्रो वः शर्म यच्छतु । उग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ ।।

प्रेत इहागच्छ इह तिष्ठ प्रेतविप्राय नमः प्रेतमावाहयामि।

११. **विष्णोरावाहनम्**

ॐ विष्णो रराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि वैष्णवमसि विष्णवे त्वा ।।

विष्णो इहागच्छ इह तिष्ठ विष्णवे नमः, विष्णुमावाहयामि ।

१२ ब्राह्मण आवाहनम्

ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः। स बुध्न्या उपमा ऽअस्य विष्ठाः सतश्च योनिमसतश्च विवः।।

ब्रह्मन् इहागच्छ इह तिष्ठ ब्रह्मणे नमः, ब्रह्माणमावाहयामि ।

१३. विष्णोरावाहनम्

ॐ विष्णो रराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि वैष्णवमसि विष्णवे त्वा ।।

विष्णो इहागच्छ इह तिष्ठ विष्णवे नमः, विष्णुमावाहयामि ।

१४. शिवस्यावाहनम्

ॐ त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम् । उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः।।

शिव इहागच्छ इह तिष्ठ शिवाय नमः, शिवमावाहयामि ।

१५. यमस्यावाहनम्

ॐ यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे । देवस्त्वा सविता मध्वानक्तु ।

पृथिव्याः सᳫंस्पृशस्पाहि । अर्चिरसि शोचिरसि तपोऽसि ।।

यम इहागच्छ इह तिष्ठ यमाय नमः, यममावाहयामि ।

१६. तत्पुरुषस्यावाहनम्

ॐ प्रेता जयता नर ऽइन्द्रो वः शर्म यच्छतु । उग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ ।।

तत्पुरुष इहागच्छ इह तिष्ठ तत्पुरुषाय नमः, तत्पुरुषं निमन्त्रयामि ।

आसन र हस्तार्घको विधिनिरूपण

सव्य भएर विष्णुदेखि यमसम्म १४ देवब्राह्मणलाई ३ टुक्रा कुश, जौ र जल लिएर वचनपूर्वक आसन अर्पण गर्नुपर्दछ । अपसव्य भएर प्रेत र तत्पुरुषलाई वचनपूर्वक कुश, तिल र जल हातमा लिएर आसन दिनुपर्दछ। यसै गरी सव्य भएर विष्णु आदि देवब्राह्मणका अगाडि दुनामा पवित्र राखेर शन्नोदेवी० इत्यादि मन्त्र पढी जल, जौ, चन्दन, फूल आदि राखी हस्तार्घ बनाउनुपर्दछ । अपसव्य भएर विना मन्त्र जल, तिल कुश, अक्षता र फूल राखी प्रेत र तत्पुरुषको निम्ति हस्तार्घ बनाउनुपर्दछ । हस्तार्घ दिंदा पनि विष्णु आदिलाई सव्य र प्रेत एवं तत्पुरुषलाई अपसव्य भएर दिनुपर्दछ।

आसनसमर्पणम्

कुशत्रययवजलमादाय- ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य मध्यमषोडशीश्राद्धे विष्णो इदमासनन्ते

नमः ॥१॥ ॐ यवोऽसीति यवान्प्रक्षिपेत् । एवं शिव इदमासनन्ते नमः ॥२॥ ॐ सपरिवार यम इदमासनन्ते नमः ॥३॥ ॐ सोमराज इदमासनन्ते नमः॥४॥ ॐ हव्यवाह इदमासनन्ते नमः॥५॥ ॐ कव्यवाह इदमासनन्ते नमः ॥६॥ ॐ काल इदमासनन्ते नमः ॥७॥ ॐ रुद्र इदमासनन्ते नमः ॥८॥ ॐ पुरुष इदमासनन्ते नमः॥९॥

अपसव्येन तिलकुशत्रयमादाय- ॐ अद्यामुकगोत्रामुकप्रेत मध्यमषोडशीश्राद्धान्तर्गतश्राद्धे एतत्कुशासनन्ते मया दीयते तवो पतिष्ठताम् ॥१०॥ सव्येन हस्तं प्रक्षाल्य आचम्य पुनः कुशत्रयमादाय ॐ विष्णो इदमासनन्ते नमः॥११॥ ॐ ब्रह्मन् इदमासनन्ते नमः॥१२॥ ॐ विष्णो इदमासनन्ते नमः॥१३॥ ॐ शिव इदमासनन्ते नमः॥१४॥ ॐ यम इदमासनन्ते नमः॥१५॥

अपसव्येन सतिलकुशत्रयमादाय- **ॐ अद्यामुकगोत्रामुकप्रेतमध्यमषोडशी- श्राद्धे तत्पुरुष इदं कुशासनन्ते मया दीयते तवो पतिष्ठताम्** । इति प्रेतब्राह्मणाय कुशासनं दद्यात्।

हस्तार्धदानम्

सव्येन आचम्य - हस्तार्घार्थं सव्यापसव्येन देवानामग्रे स्थापितेषु नवसु पुटकेषु दक्षिणाग्रपवित्राणि धृत्वा दशमपुटके अपसव्येन पवित्रं धृत्वा पुनः सव्येन पञ्चसु पुटकेषु पवित्रं निधाय अपसव्येन

षोडशके पुटके पवित्रं धृत्वा सव्येन नवसु पुटकेषु **ॐ शन्नोदेवीरिति** जलम्, **यवोसीति** यवान्, **गन्धद्वारामिति** गन्धम्, **श्रीश्चते** इति पुष्पाणि प्रक्षिपेत् ।

अपसव्येन दशमपुटके (प्रेतपात्रे) जलतिलदर्भगन्धाक्षतपुष्पाणि तूष्णीं क्षिपेत् । पुनः सव्येन पञ्चसु पुटकेषु, अपसव्येन षोडशके पुटके जलगन्धादीनि क्षिपेत् । सव्येन हस्तार्घपात्रं वामहस्ते कृत्वा पवित्रं पूर्वाग्रं देवकरे धृत्वा दक्षिणकरेण आच्छाद्य **ॐ यादिव्याआपः पयसासंबभूवुर्याअन्तरिक्षा उतपार्थिवीर्याः । हिरण्यवर्णायज्ञियास्तानआपः- शिवाः सᳬं** स्योनाः सुहवाभवन्तु इत्यभिमन्त्र्य कुशयवजलान्यादाय- **ॐ अद्यामुकगोत्रस्याऽमुकप्रेतस्य प्रेतत्व निवृत्त्युत्तमलोकप्राप्त्यर्थं क्रियमाणमध्यमषोडशीश्राद्धे विष्णो एष हस्तार्घस्ते नमः ।** इति पवित्रोपरि अर्घं दद्यात् । अर्घे पुनः प्रत्यर्घमस्तु पवित्रसहितं तदर्घपात्रं भोजनपात्रस्य दक्षिणपार्श्वे उत्तानमेव धारयेत् ॥१॥ एवं सर्वत्र विधेयम् । शिवादिभ्योपि देयम् । ॐ शिव एष हस्तार्घस्ते नमः ॥२॥ ॐ सपरिवारयमाय एष हस्तार्घस्ते नमः ॥३॥ ॐ सोमराज एष हस्तार्घस्ते नमः॥४॥ ॐ हव्यवाह एष हस्तार्घस्ते नमः॥५॥ ॐ कव्यवाह एष हस्तार्घस्ते नमः॥६॥ ॐ काल एष हस्तार्घस्ते नमः॥७॥ ॐ रुद्र एष हस्तार्घस्ते नमः॥८॥ ॐ पुरुष एष हस्तार्घस्ते नमः॥९॥

अपसव्येन दशमप्रेतहस्तार्घपात्रमादाय- **ॐ अद्यामुकगोत्रामुक- प्रेत ! प्रेतत्वनिवृत्तये क्रियमाणमध्यमषोडशीश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम् ।** इति प्रेतब्राह्मणकरे अर्घ दद्यात् ॥१०॥ सव्येन आचम्य हस्तार्घमादाय पूर्ववत्कृत्वा- ॐ विष्णो एष हस्तार्घस्ते नमः॥११॥ ॐ ब्रह्मन् एष हस्तार्घस्ते नमः ॥१२॥ ॐ विष्णो एष हस्तार्घस्ते नमः॥१३॥ ॐ शिव एष हस्तार्घस्ते नमः ॥१४॥ ॐ यम एष हस्तार्घस्ते नमः॥१५॥

***अपसव्येन* - अद्यामुकगोत्रामुकप्रेतस्य मध्यमषोडशीश्राद्धे तत्पुरुष एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम् ।** इति प्रेतब्राह्मणाय हस्तार्घ दद्यात् ॥१६॥ सव्येन शिवादिहस्तार्घपात्राणि शिवाय स्थानमसीति तत्तद्दक्षिणपार्श्वे उत्तानमेव स्थापयेत् । अपसव्येन प्रेतासनवामपार्श्वे प्रेताय स्थानमसीति उत्तानमेव स्थापयेत् तदुपरि कुशान् दद्यात् ।

ब्राह्मणपूजनको विधिनिरूपण

सव्य भएर कुश, जौ र जललिएर विष्णुदेखि यमसम्मका देवताहरूलाई वचन पढेर चन्दन, अक्षता, फूल जनै वस्त्र आदि अर्पण गर्नुपर्दछ । अपसव्य भएर प्रेत र तत्पुरुषलाई वचन पढेर चन्दन, अक्षता, फूल, जनै वस्त्र आदि समर्पण गर्नुपर्दछ ।

ब्राह्मणपूजनम्

ततः सव्येन विष्ण्वादियमपर्यन्तदेवेभ्यो गन्धाक्षतपुष्पयज्ञोपवीत वस्त्रद्रव्याणि दत्त्वा धूपदीपनैवेद्यानि

कुर्यात् ।

कुशयवजलान्यादाय- **ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य प्रेतत्वनिवृत्तये क्रियमाणमध्यम-षोडशीश्राद्धे एतानि गन्धाक्षतपुष्पधूप दीपनैवेद्यताम्बूल- यज्ञोपवीतद्रव्यवासांसि वो नमः।**

अपसव्येन प्रेत ब्राह्मणं गन्धादिभिरभ्यर्च्य धूपदीपौ च कारयेत् । कुशादिकमादाय- **ॐ अद्यामुकगोत्रामुकप्रेतस्य मध्यमषोडशीश्राद्धे विप्रार्चनविधौ इमानि गन्धादीनि यथाशक्त्युपकल्पितानि युवाभ्यां मया दीयन्ते युवयोरुपतिष्ठन्ताम्** । इति विप्रनिकटे उत्सृजेत् ।

सव्येन विष्वादिदेवेभ्यः क्रमेण जलगन्धादिकं देयम् । अपसव्येन प्रेतब्राह्मणाभ्यां जलगन्धादिकं देयम् ।

भूस्वामी अन्नदानको विधिनिरूपण

प्रेतको भोजनपात्र अगाडि - **यथा चक्रायुधो०** पढेर चतुष्कोण मण्डल बनाउने, अपसव्य भएर वचन पढ्दै भूस्वामी गर्नुपर्दछ ।

भूस्वामिने अन्नदानम्

प्रेतभोजनपात्रस्याग्रतः- **यथा चक्रायुधो विष्णुस्त्रैलोक्यं परिरक्षति ।**
एवं मण्डलभस्मैतत् सर्वभूतानि रक्षतु ।।

इति चतुष्कोणमण्डलं कुर्यात् । अपसव्येन तिलजलघृतमधुयुतमन्नं कुशसहितमादाय पूर्वसङ्कल्पमुच्चार्य - **ॐ इदमन्नं सजलं तिलघृतमधुयुतमेतद्भूस्वामिपितृभ्यो नमः** इत्युत्सृजेत्।

अन्नदानको विधिनिरूपण

सव्य भएर सबै सामग्रीयुक्त सीधामा तीनपटक मधु ३ पढेर मह छर्कनुपर्दछ। दुवै हातका हत्केला घोप्टो पारी बायाँ नाडीमाथि दाहिने नाडी राखी सीधा ढाकेर पृथिवीते पात्रं० विष्णो हव्यमिदं० पढ्नुपर्दछ । सीधाका वरिपरि **यवोऽसि०** पढेर जौ छर्की वचनपूर्वक १ देखि ९ सम्मका ९ सीधा दिनुपर्दछ ।

अन्नदानसङ्कल्पः

सव्येन सोपस्करजलयुतमन्नमुपनीय अन्नोपरि मधु दत्त्वा **ॐ मधु मधु मधु** इति त्रिर्जपित्वा उत्तानपाणिभ्यां प्रथमापन्नपात्रमालभ्य- **ॐ पृथिवीतेपात्रंद्यौरपिधानं ब्राह्मणस्यमुखेअमृतेऽ-अमृतंजुहोमिस्वाहा ।। इदं विष्णुः** इति **विष्णोहव्यमिदं रक्ष मदीयमिति** च पठित्वा वामेन पात्रमत्यजन् दक्षिणहस्ताङ्गुष्ठमन्नजलघृतादिषु निवेश्य- **ॐ यवोसीति** परितो यवान्विकीर्य दक्षिणहस्तेन कुशादिकमादाय - **ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य प्रेतत्व विमुक्त्युत्तमलोकप्राप्तये क्रियमाणमध्यम षोडशीश्राद्धे एतदन्नं सोपस्करममृतरूपं हव्यं विष्णवे स्वाहा संपद्यतां न मम।**

इत्युत्सृजेत् ॥१॥ एवं शिवाय ॥२॥ यमाय सपरिवाराय ॥३॥ सोमराजाय ॥४॥ हव्यवाहाय॥५॥ कव्यवाहाय ॥६॥ कालाय ॥७॥ रुद्राय ॥८॥ पुरुषाय च ॥९॥ दद्यात् ।

प्रेतार्थ अन्नदानको विधिनिरूपण

अपसव्य भएर प्रेतको सीधा वरिपरि तिल छर्की तिल, कुश, जल लिएर सीधा सङ्कल्प गर्नुपर्दछ ।

प्रेतायान्नदानसङ्कल्पः

अपसव्येन तिलान् विकीर्य दशमप्रेतान्नपात्रमालभ्य कुशतिलजलान्यादाय- **ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य क्रियमाणमध्यम षोडशीश्राद्धे इदमन्नं सोपस्करं ते मया दीयते तवोपतिष्ठताम्** । इत्युत्सृजेत् ॥१०॥

विष्णु आदि देवब्राह्मणका निमित्त अन्नदानको विधिनिरूपण

सव्य भएर विष्णुदेखि यमसम्मका ११ देखि १५ सम्मका देवब्राह्मणलाई सीधा सङ्कल्प गर्नुपर्दछ ।

विष्णवादियमपर्यन्तेभ्योऽन्नदानम्

ततः सव्येन- विष्णवे ॥११॥ ब्रह्मणे ॥१२॥ विष्णवे ॥१३॥ शिवाय ॥१४॥

यमाय ॥१५॥ च दद्यात् ।

तत्पुरुषार्थ अन्नदानको विधिनिरूपण

अपसव्य भएर तत्पुरुषको सीधा वरिपरि तिल छर्की तिल, कुश, जल लिएर सीधा सङ्कल्प गर्नुपर्दछ ।

तत्पुरुषायान्नदानम्

अपसव्येन वामावर्तेन तिलान्विकीर्य कुशतिलजलान्यादाय- **ॐ अद्यामुक गोत्रामुकप्रेतस्य क्रियमाणमध्यमषोडशीश्राद्धे तत्पुरुषाय इदमन्नं सोपस्करं ते मया दीयते तवोपतिष्ठताम्।** इत्युत्सृजेत् ॥१६॥

वेदिकानिर्माण, अवनेजन र पिण्डदानसम्बन्धी विधिनिरूपण

सव्य भएर विष्णु आदि ब्राह्मणको हातमा र अपसव्य भएर प्रेत ब्राह्मणको हातमा जल दिनुपर्दछ । सव्य भएर चौधवटा पिण्डवेदी र अपसव्य भएर दुईवटा प्रेत र तत्पुरुषका निमित्त पिण्डवेदी बनाउनुपर्दछ । सव्य भएर विष्णु आदिका १४ वेदीमा अवनेजन दिई अपसव्य भएर प्रेत र तत्पुरुषवेदीमा अवनेजन दिनुपर्दछ । यही क्रमले सव्य भएर देवब्राह्मणका लागि पिण्ड बनाई अपसव्य भएर प्रेत र तत्पुरुषका लागि पिण्ड बनाएर पिण्ड र प्रत्यवनेजन दिने काम

गर्नुपर्दछ ।

विशेष- पिण्ड बनाउँदा बेलका दाना बराबर बाटुला बनाई तिनमा तिल, घिउ र मह मिलाउनु पर्छ।

विष्ण्वादिभ्यो जलार्पणं पिण्डवेदिकानिर्माणादिकञ्च

जलार्पणम् -सव्येनाचम्य **अन्नसङ्कल्पसिद्धिरस्तु** इति विष्ण्वादिदेवकरे जलं दत्त्वा अपसव्येन प्रेतब्राह्मणकरयोर्जलं देयम् ।

प्रार्थनादिकम् - सव्येन मधुवाता इति ऋचं **मधु मधु मधु** इति च पठेत्।

अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् ।
तत्सर्वमच्छिद्रमस्तु भास्करस्य प्रसादतः।।
नमस्तुभ्यं विरुपाक्ष नमस्तेऽनेकचक्षुषे ।
नमः पिनाकहस्ताय वज्रहस्ताय वै नमः।। इति पठेत् ।
अयोध्या मथुरा माया काशी काञ्ची ह्यवन्तिका ।
पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः।।

इति स्मृत्वा सव्येन चतुर्दशवेदिकाः, अपसव्येन वेदिकाद्वयञ्च कुर्यात् । सव्यापसव्याभ्यां

पिण्डिकासेचनं जलेन कुर्यात् ।

अवनेजनम् - तदनु सव्यापसव्याभ्यां षोडशवेदिकायां छिन्नमूलकुशानास्तीर्य सव्येन नवसु पुटकेषु कुशजलयवगन्धपुष्पाणि क्षिप्त्वा सकुशोदकेन प्रथमावनेजनपात्रमादाय- **ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य मध्यम षोडशीश्राद्धे विष्णुपिण्डस्थानेऽत्रावनेनिक्ष्व ते नमः** इति प्रथमदर्भोपरि अवनेजनं दद्यात् ॥१॥ एवं प्रकारेण शिवाय ॥२॥ सपरिवाराय यमाय ॥३॥ सोमराजाय॥४॥ हव्यवाहाय ॥५॥ कव्यवाहाय ॥६॥ कालाय ॥७॥ रुद्राय ॥८॥ पुरुषाय च ॥९॥ दद्यात् ।

अपसव्येन कुशतिलजलान्यादाय- **ॐ अद्यामुकगोत्रस्यामुक प्रेतस्य मध्यमषोडशीश्राद्धे इदमवनेजनन्ते मया दीयते तवोपतिष्ठताम्** ।इति दशमदर्भोपरि दद्यात् ॥१०॥

ततः सव्येन विष्णुब्रह्मविष्णुशिवयमेभ्योऽवनेजनं दद्यात् ॥११॥ ॥१५॥

अपसव्येन कुशतिलजलान्यादाय तत्पुरुषाय अवनेजनं दातुं सङ्कल्पं कुर्यात् - **ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य मध्यमषोडशीश्राद्धे तत्पुरुषपिण्डस्थाने ऽत्रावनेनिक्ष्व ते मया दीयते तवोपतिष्ठताम्** । इति तत्पुरुषदर्भोपरि दद्यात् ॥१६॥

पिण्डदानम् -ततः सव्येन तिलघृतमधुयुतविल्वप्रमाणान् सुवर्तुलान् षोडश पिण्डान्निर्माय

सव्येनैव कुशयवजलयुतं प्रथमपिण्डं वामहस्ते पुटकादिस्थजलमादाय- **ॐ अद्यामुकगोत्रस्यामुक-प्रेतस्य प्रेतत्वनिवारणार्थं क्रियमाणमध्यमषोडशीश्राद्धे विष्णो एष पिण्डस्ते नमः।** इति प्रथमावनेजनोपरि दद्यात् ॥१॥ एवंरीत्या शिवाय ॥२॥ यमाय सपरिवाराय ॥३॥ सोमाय ॥४॥ हव्यवाहाय ॥५॥ कव्यवाहाय ॥६॥ कालाय ॥७॥ रुद्राय ॥८॥ पुरुषाय च ॥९॥ दद्यात्।

अपसव्येन कुशतिलजलयुतं दशमं पिण्डमादाय - **ॐ अद्यामुकगोत्रा- मुकप्रेतस्य एकादशाहे क्रियमाणमध्यमषोडशीश्राद्धे एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्** इति अवनेजनोपरि पिण्डं दद्यात् ॥१०॥

पुनः सव्येन आचम्य- विष्णवे ॥११॥ ब्रह्मणे ॥१२॥ विष्णवे ॥१३॥ शिवाय ॥१४॥ यमाय ॥१५॥ पिण्डान् दद्यात्।

***पुनः अपसव्येन कुशतिलजलसहितं पिण्डमादाय*- अद्यामुकगोत्रामुक- एकादशाहे क्रियमाणमध्यमषोडशीश्राद्धे तत्पुरुष एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्** । इत्यवनेजनोपरि पिण्डं दद्यात् ॥१६॥

प्रत्यवनेजनम् - सव्येन प्रत्यवनेजनपात्रमादाय- **ॐ अद्यामुकगोत्र- स्यामुकप्रेतस्य मध्यमषोडशीश्राद्धे विष्णो इदं पिण्डप्रत्यवनेजनन्ते नमः॥१॥** एवं शिवपिण्डे ॥२॥

सपरिवारयमपिण्डे ॥३॥ सोमराजपिण्डे ॥४॥ हव्यवाहपिण्डे ॥५॥ कव्यवाहपिण्डे ॥६॥ कालपिण्डे ॥७॥ रुद्रपिण्डे ॥८॥ पुरुषपिण्डे च ॥९॥ दद्यात् ।

अपसव्येन प्रत्यवनेजनपात्रमादाय- **ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य मध्यमषोडशीश्राद्धे प्रेत इदं पिण्डप्रत्यवनेजनन्ते नमः।** इति प्रेतपिण्डे दद्यात् ॥१०॥

एवमेव सव्येन विष्णुपिण्डे ॥११॥ ब्रह्मपिण्डे ॥१२॥ विष्णुपिण्डे ॥१३॥ शिवपिण्डे ॥१४॥ यमपिण्डे ॥१५॥ प्रत्यवनेजनं दद्यात् ।

अपसव्येन कुशतिलजलमादाय - **ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य क्रियमाणमध्यमषोडशीश्राद्धे तत्पुरुष इदं पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्** । इति प्रत्यवनेजनं दद्यात् ॥१६॥

पिण्डार्चनसम्बन्धी विधिनिरूपण

सव्य भएर विष्णु आदिका पिण्डमा धागो राखी पिण्डपूजा र धूपबत्ती गर्नुपर्दछ। अपसव्य भएर प्रेत र तत्पुरुषको पिण्डमा धागो राखी पिण्डपूजा र धूपबत्ती गर्नुपर्दछ ।

पिण्डाऽर्चनादिकम्

सूत्रार्पणम् - सव्येन वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय विष्णुपिण्डे **एतद्वासस्ते नमः** इति दद्यात् । एवं शिवादियमपर्यन्तपिण्डेषु सूत्रं दद्यात् ।

***ततोऽपसव्येन* -ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य क्रियमाणमध्यमषोडशी श्राद्धे प्रेततत्पुरुष-पिण्डयोरेतेवाससी युवाभ्यां मया दीयेते युवयोरुपपतिष्ठेताम्** । इति दद्यात् ।

पिण्डार्चनम् - सव्येन विष्णुशिवादिचतुर्दशपिण्डान् गन्धाक्षतपुष्पवस्त्रद्रव्ययज्ञोपवीतताम्बूला- दिभिः संपूज्य धूपदीपौ च कारयेत् । कुशादिकमादाय- **ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य प्रेतत्व निवृत्तये एकादशाहे क्रियमाणमध्यमषोडशीश्राद्धे विष्णोः पिण्डार्चनविधौ इमानि यथो-पकल्पितानि मद्दत्तानि गन्धादीनि युवाभ्यामुपतिष्ठन्ताम्** । इत्युत्सृजेत् । एवं शिवादिभ्योऽपि देयम् ।

ततोऽपसव्येन प्रेततत्पुरुषपिण्डद्वयं गन्धादिभिरभ्यर्च्य धूपदीपौ च कृत्वा कुशादिकमादाय - **ॐ अद्यामुकगोत्रामुकप्रेतस्य क्रियमाणमध्यमषोडशीश्राद्धे प्रेततत्पुरुषयोः पिण्डाऽर्चनविधौ इमानि यथोप कल्पितानि मद्दत्तानि गन्धादीनि ते संपद्यन्तां नमः** । इत्युत्सृजेत् ।

सव्येन पिण्डार्चन विधेः परिपूर्णतास्तु इति देवब्राह्मणकरेषु जलं दद्यात् । अपसव्येन प्रेतब्राह्मणकरयोर्जलं देयम् । सव्येन पिण्डशेषान्नं विष्णुशिवादि- पिण्डसमीपे विकिरेत् । अपसव्येन प्रेतपिण्डसमीपे विकिरेत् ।

ततः **ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सद्गतिरुत्तमलोकप्राप्तिश्च भवतु** इति पठित्वा सव्येन आचम्य देवान्नपात्रेषु **शिवा आपः सन्तु** इति जलम्, **सौमनस्यमस्तु** इति पुष्पम्, **अक्षतञ्चारिष्टमस्तु** इति तण्डुलान्क्रमेण दद्यात्। अपसव्येन प्रेतान्नपात्रयोः सुप्रेक्षितादि कुर्यात् ।

अक्षयोदक, जलाञ्जलि, दक्षिणासम्बन्धी विधिनिरूपण

विष्णु आदिलाई सव्य र प्रेत एवं तत्पुरुषलाई अपसव्य भएर अक्षयोदक दिनुपर्दछ । अपसव्य भएर प्रेतपिण्डमा दूध दिनुपर्दछ । सव्य भएर विष्णु आदिका पिण्डमा तिल, जौ, दूध, सर्वौषधि, तुलसीपत्र र सुन मिसिएको जलले वचनपूर्वक अञ्जलि दिएर अपसव्य भएर प्रेत र तत्पुरुषको पिण्डमा जलाञ्जलि दिनुपर्दछ । त्यसपछि सव्य भएर सोह्रवटै पिण्ड सुँघेर चौधवटा पिण्ड सव्य भएर उठाउनुपर्दछ । प्रेत र तत्पुरुषका पिण्ड अपसव्य भएर उठाई पिण्डमुनिका कुशहरू अग्निमा राख्नुपर्दछ । पिण्डहरू वेदीमा राखी देवताका अर्घपात्रहरू सव्य भएर र प्रेतका अर्घपात्र अपसव्य भएर संचालन गर्नुपर्दछ । त्यसपछि सव्य भएर आचमन गरी दक्षिणाको पूजा गरेपछि दक्षिणासंकल्प गर्नुपर्दछ । दक्षिणासङ्कल्प गरिसकेपछि भूयसी दक्षिणा गरी **देवताभ्यः ०** आदि मन्त्र पढेर समापन गर्नुपर्दछ ।

अक्षयोदकादिदानानि

अक्षोदकदानम् - ततः सव्येन - पुटकादौ कुशयवजलान्यादाय- **ॐ अद्यामुकगोत्रस्यामुक-प्रेतस्योत्तमलोकावाप्तये विहितमध्यमषोडशीश्राद्धे विष्णोर्दत्तैतदन्नपानादिकमक्षप्यमस्तु ते नमः।** इत्यक्षयोदकं दद्यात् । एवं शिव-यम-सोमराज-हव्यवाह-कव्यवाह-काल-रुद्रपुरुषाणां षष्ठ्या विभक्त्या क्रमेण अक्षयोदकं दद्यात् ।

ततोऽपसव्येन पुटके कुशतिलजलान्यादाय-**ॐ अद्यामुकगोत्रस्यामुक प्रेतस्य मध्यमषोडशीश्राद्धे प्रेतस्य दत्तैतदन्नपानादिकमक्षयमुपतिष्ठताम्।** इति अक्षयोदकं देयम् ।

पुन: विष्णु - ब्रह्म-विष्णु-शिव- यमानामक्षयोदकं दद्यात् ।

पुन: अपसव्येन- **ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य मध्यमषोडशीश्राद्धे तत्पुरुषस्य दत्तैतदन्नपानादिकमक्षयमुपतिष्ठताम्** इत्यक्षयोदकं दद्यात् ।

सव्येन **अघोर: प्रेतोस्तु** इति (प्रेता स्त्री चेत् - **अघोरा प्रेता अस्तु** इति वदेत् ।) दक्षिणां दिशं पश्यन् प्रेतपिण्डयो: पूर्वाग्रामेकामेकां जलधारां दद्यात्। अत्राशीर्वादप्रार्थनानिषेध:।

दुग्धदानम् - तत: उर्ज्जवहन्तीरमृतमिति मन्त्रेण अपसव्येन प्रेतपिण्डयो: इदमूर्जन्युवाभ्यां मया दीयते युवयोरुपतिष्ठतामिति दद्यात् ।

अञ्जलिदानम्

तत: सव्येन तिलयवदुग्धसर्वौषधितुलसीदलहिरण्यमिश्रितोदकमादाय-**ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य परलोकेमहातृषानिवारणार्थं विहितमध्यमषोडशी श्राद्धे पिण्डोपरि एकैकमन्त्रेण द्विर्द्विरञ्जलिदानमहं करिष्ये।** इत्यञ्जलिदान प्रतिज्ञासङ्कल्पं कुर्यात् । ततोऽधस्तनमन्त्रं पठेत् - **ॐ अपोदेवा मधुमतीरगृभ्णन्नूर्जस्वतीराजस्वश्चिताना: ।। याभिर्मित्रावरूणावभ्यषिञ्चन्याभिरिन्द्रमन- यन्नत्परातीः** ।। इति पठित्वा तिलयवदुग्धसर्वौषधितुलसीदलहिरण्य-मिश्रितोदकेन- **ॐ अद्यामुकगोत्रस्यऽमुकप्रेतस्य विहितैकादशाहे मध्यमषोडशीश्राद्धे प्रथमे विष्णुपिण्डे**

जलन्ते नमः। इति द्वावञ्जली दद्यात् । ॐ. इषेत्वा इषेत्वोर्ज्जेत्वा वायवस्थ देवो वः सविता प्रापयतुश्रेष्ठ तमाय कर्मणऽ आप्यायध्वमघ्न्याऽइन्द्राय भागं प्रजावतीरनमीवाऽअयक्ष्मा वस्तेनऽईशत माघशसो ध्रुवाऽअस्मिन गोपतौ स्यात वह्वीर्यजमानस्य पशून् पाहि ॥१॥

एवं पूर्वोक्तप्रकारेण **द्वितीये शिवपिण्डे जलाञ्जलिस्ते नमः** इति सङ्कल्प्य अधस्तनमन्त्रं पठन् जलाञ्जलिं दद्यात् । ॐ उपयामगृहीतोऽस्यन्तर्यच्छ मघवन्पाहि सोमम् । उरुष्य राय यजस्व ॥२॥

एवमेव **तृतीये सपरिवारयमपिण्डे जलाञ्जलिस्ते नमः** इति सङ्कल्प्य अधस्तनमन्त्रं पठन् सपरिवारयमपिण्डे जलाञ्जलिं दद्यात् । **ॐ येना पावक चक्षसा भुरण्यन्तं जनाँ २।। ऽअनु। त्वं वरूण पश्यसि ।।३।।**

एवमेव **चतुर्थे सोमराजपिण्डे जलाञ्जलिस्ते नमः** इति सङ्कल्प्य अधस्तनमन्त्रं पठन् हव्यवाहपिण्डे जलाञ्जलिं दद्यात् । ॐ ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ । अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ॥४॥

एवमेव **पञ्चमे हव्यवाहपिण्डे जलाञ्जलिस्ते नमः** इति सङ्कल्प्य अधस्तनमन्त्रं पठन् जलाञ्जलिं दद्यात् । ॐ समुद्रं गच्छ स्वाहान्तरिक्षं गच्छ स्वाहा देवꣳ सवितारं गच्छ स्वाहा

मित्रावरुणौ मच्छ स्वाहा होरात्रे गच्छ स्वाहा छन्दाꣳसि गच्छ स्वाहा द्यावापृथिवी गच्छ स्वाहा यज्ञं गच्छ स्वाहा सोमै गच्छ स्वाहा दिव्य नभो गच्छ स्वाहाग्निं वैश्वानरं गच्छ स्वाहा। मनो मे हार्दि यच्छ दिवं ते धूमो गच्छतु स्वर्ज्योतिः पृथिवीं भस्मनापृण स्वाहा ॥५॥

एवमेव **षष्ठे कव्यवाहपिण्डे जलाञ्जलिस्ते नमः** इति सङ्कल्प्य अधस्तनमन्त्रं पठन् जलाञ्जलिं दद्यात्। ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्य स्वाहा। अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा। ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा ॥६॥

एवमेव **सप्तमे कालपिण्डे जलाञ्जलिस्ते नमः** इति सङ्कल्प्य अधस्तनमन्त्रं पठन् जलाञ्जलिं दद्यात्। ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हुविषा विधेम ॥७॥

एवमेव अष्टमे **रुद्रपिण्डे जलाञ्जलिस्ते नमः** इति सङ्कल्प्य अधस्तनमन्त्रं पठन् जलाञ्जलिं दद्यात्। ॐ इषेत्वा इषेत्वोर्ज्जेत्वा वायवस्थ देवो वः सविता प्रापयतुश्रेष्ठ तमाय कर्मणऽ आप्यायध्वमघ्न्याऽइन्द्राय भागं प्रजावतीरनमीवाऽअयक्ष्मा वस्तेनऽईशत माघशसो ध्रुवाऽअस्मिन गोपतौ स्यात वह्वीर्यजमानस्य पशून् पाहि ॥८॥

एवमेव नवमे **पुरुषपिण्डे जलाञ्जलिस्ते नमः** इति सङ्कल्प्य अधस्तनमन्त्रं पठन् जलाञ्जलिं दद्यात् । ॐ यज्जाग्रतो दूरमुदैति दैव तदु सुप्तस्य तथैवेति । दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिव संङ्कल्पमस्तु ॥९॥

ततोऽपसव्येन - **ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य प्रेतत्व निवृत्तये उत्तमलोकावाप्तये एकादशाहे विहितमध्यमषोडशीश्राद्धे महातृषानिवारणार्थं दशमे प्रेतपिण्डे जलाञ्जलिस्ते उपतिष्ठताम् ।** इति सङ्कल्प्य अधस्तनमन्त्रं पठन् द्वावञ्जली दद्यात् । ॐ याः फलिनीर्याऽअफला ऽअपुष्पा याश्च पुष्पिणीः। बृहस्पति प्रसूतास्ता नो मुञ्चन्व त्वᳬ हसः॥१०॥

ततः सव्येन **एकादशे विष्णुपिण्डे जलाञ्जलिस्ते नमः** इति सङ्कल्प्य अधस्तनमन्त्रं पठन् जलाञ्जलिं दद्यात् । ॐ विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरूत विश्वतस्पात् । सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देव ऽएकः ॥११॥

एवमेव द्वादशे **ब्रह्मपिण्डे जलाञ्जलिस्ते नमः** इति सङ्कल्प्य अधस्तनमन्त्रं पठन् जलाञ्जलिं दद्यात् । ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः । स बुध्न्या उपमा ऽअस्य विष्ठाः सतश्च योनिमसतश्च विवः॥१२॥

एवमेव **त्रयोदशे विष्णुपिण्डे जलाञ्जलिस्ते नमः** इति सङ्कल्प्य अधस्तनमन्त्रं पठन्

जलाञ्जलिं दद्यात् । ॐ इषेत्वा इषेत्वोर्ज्जेत्वा वायवस्थ देवो वः सविता प्रापयतुश्रेष्ठ तमाय कर्मणऽ आप्यायध्वं मघ्न्याऽइन्द्राय भागं प्रजावतीरनमीवाऽअयक्ष्मा वस्तेनऽईशत माघशँ सोध्रुवाऽअस्मिन गोपतौ स्यात वह्वीर्यजमानस्य पशून् पाहि ॥१३॥

एवमेव **चतुर्दशे शिवपिण्डे जलाञ्जलिस्ते नमः** इति सङ्कल्प्य अधस्तनमन्त्रं पठन् जलाञ्जलिं दद्यात् । ॐ नमस्ते रुद्र मन्यव ऽउतो त इषवे नमः। बाहुभ्यामुत ते नमः ॥१४॥

एवमेव **पञ्चदशे यमपिण्डे जलाञ्जलिस्ते नमः** इति सङ्कल्प्य अधस्तनमन्त्रं पठन् जलाञ्जलिं दद्यात् । ॐ शं नो देवीरभिष्टय ऽआपो भवन्तु पीतये । शं योरभिस्त्रवन्तु नः॥१५॥

अपसव्येन - **ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य विहितमध्यम षोडशीश्राद्धे महातृषानिवारणार्थं षोडशे तत्पुरुषपिण्डे जलाञ्जलिस्ते नमः** इति सङ्कल्प्य अधस्तनमन्त्रं पठन् जलाञ्जलिं दद्यात् । ॐ प्रेता जयता नर ऽइन्द्रो वः शर्म यच्छतु । उग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ ॥१६॥

ततः सव्येन तेनैवोदकेन - **ॐ अद्यामुकगोत्रामुकप्रेत ! परलोके महातृषानिवारणार्थं विहितमध्यमषोडशीश्राद्धे विष्ण्वादितत्पुरुषपर्यन्तषोडशपिण्डोपरि इदमुदकमुपतिष्ठतु** इति त्रिवारमेकवारं वा जलधारां दद्यात् ।

षोडश पिण्डान्सव्येन आघ्राय चतुर्दश सव्येनैवोत्थापयेत्, प्रेतपिण्डद्वयमपसव्येनोत्थापनीयम्। पिण्डाधारकुशान्वह्नौ क्षिपेत्। पिण्डा वेद्यां स्थापनीयाः।

दक्षिणा- देवार्घपात्राणि सव्येन प्रेतयोरपसव्येन सञ्चाल्य सव्यं कृत्वाचम्य दक्षिणासङ्कल्पं कुर्यात्। ततो देयद्रव्यमादाय पूजयित्वा - **ॐ तत्सत्पूर्वसङ्कल्पसिद्धिरस्तु अद्यामुकगोत्रस्यामुकप्रेतस्य एकादशाहे प्रेतत्व निवृत्तिपूर्वकोत्तमलोकप्राप्त्यर्थं विहित मध्यमषोडशीश्राद्धान्तर्गतविष्णुप्रभृतियमपर्यन्तप्रीतये यथानामगोत्रेभ्यो ब्राह्मणेभ्यो दातुमह मुत्सृजे** इति। पुनः प्रेतब्राह्मणद्वयोरपि सङ्कल्पपूर्वकं दक्षिणा देया। ततो भूयसीदक्षिणां सङ्कल्प्य दद्यात्।

प्रार्थना - **ततः देवताभ्यः पितृयश्च महायोगिभ्य एव च।**
नमः स्वाहायै स्वधायै नित्यमेव नमो नमः॥

इति त्रिर्जपेत्।

अनादिनिधनो देवः शङ्खचक्रगदाधरः।
अक्षय्यः पुण्डरीकाक्ष ! प्रेतमोक्षप्रदो भव॥१॥

ततो दीपमाच्छाद्य हस्तौ पादौ प्रक्षाल्य आचम्य अस्मिन् मध्यम षोडशीश्राद्धे न्यूनातिरिक्तं

यत्कृतं तत्सुकृतमस्तु यन्नकृतं तद्विष्णोः प्रसादात् ब्राह्मणवचनात्सर्वं परिपूर्णमस्तु प्रेतस्य अक्षय्यतृप्तिः प्रेतत्वविमुक्तिश्च भवतु । इति प्रार्थयेत् । **ॐ भद्रं कर्णेभिरिति देवविसर्जनं कुर्यात्** ।ततः क्षमाप्रार्थनां कुर्यात् ।

क्षमाप्रार्थना - प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ।।
यस्य स्मृत्या च नामोक्त्या तपः श्राद्धक्रियादिषु ।
न्यूनं सपूर्णतां याति सद्यो वन्दे तमच्युतम् ।।
अतसीपुष्पसंकाशं पीतवाससमच्युतम् ।
ये नमस्यन्ति गोविन्दं न तेषां विद्यते भयम् ।।

ॐ विष्णवे नमः, ॐ अच्युताय नमः इति च वारत्रयं जपेत् इति।

इति मध्यमषोडशीश्राद्धविधि

०००

परिशिष्टम्

१. प्रेतघटदानविधिः (प्रेतघडा दान)

विधिनिरूपण

सुनको राम्रो प्रेत घडा बनाई त्यसमा ब्रह्मा, विष्णु, महेश्वर र लोकपालहरूको नाम लेखी दूध, घिउले भर्नुपर्दछ । घडाको माझमा ब्रह्मा, विष्णु, महेश्वरको स्थापना गरी **ब्रह्मयज्ञानम्०** यस मन्त्रले ब्रह्माजीको, **ॐ इदं विष्णु०** यस मन्त्रले भगवान् विष्णुको, **ॐ नमः शम्भवाय०** यस मन्त्रले भगवान् शङ्करको चन्दनाक्षता आदिले पूजा गर्नुपर्दछ । घडा वरिपरि पूर्वादि क्रमले पूर्वमा इन्द्र, दक्षिणमा यम, पश्चिममा वरुण उत्तरमा कुवेरहरूको तत्तन्मन्त्रले श्रद्धापूर्वक पूजा गरी ब्राह्मणको पनि पूजा गर्नुपर्दछ । त्यसपछि धूप, दीप, नैवेद्य गरी सङ्कल्पपूर्वक घडादान गरेर ब्राह्मणलाई दिनुपर्दछ । त्यसपछि प्रार्थना गरी दानप्रतिष्ठा र दक्षिणासमेत ब्राह्मणका हातमा दिनुपर्दछ।

विधिः - मनोरमं सुवर्णमयं घटं विधाय घटमध्ये ब्रह्मविष्णुशिवानां नामानि तथा चतुर्दिक्षु चतुर्णां लोकपालानां नामानि पूर्वादितः क्रमेण इन्द्रयम वरुणकुवेराणां नामानि विलिख्य दुग्धाज्याभ्यां

घटं पूरयित्वा पूजयेत् ।

ब्रह्मपूजनम्

ॐ ब्रह्मं जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः। स बुध्न्या उपमा ऽअस्य विष्ठाः सतश्च योनिमसतश्च विवः।। ॐ ब्रह्मणे नमः चन्दनाक्षतपुष्पाणि समर्पयामि इति।

विष्णुपूजनम्

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाꣳसुरे स्वाहा ।। **ॐ विष्णवे नमः** चन्दनाक्षतपुष्पाणि समर्पयामि इति।

शङ्करपूजनम्

नमः शम्भवाय च मयोभवाय च मनः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च ।। **ॐ शङ्कराय नमः** इति गन्धपुष्पादिभिरर्चयेत् ।

लोकपालपूजनम्

घटस्य पूर्वभागे - त्रातारमिन्द्र० इति मन्त्रेण इन्द्रं गन्धादिभिः पूजयेत् ।

यमायत्वा मखायत्वा इति मन्त्रेण दक्षिणभागे यमं पूजयेत् ।

पश्चिमभागे - वरुणस्य० इति मन्त्रेण गन्धादिभिः वरुणमर्चयेत् ।

उत्तरभागे - कुवेरं० इति मन्त्रेण चन्दनादिभिः कुवेरमर्चयेत् ।

ततो देयब्राह्मणम् सम्पूज्य धूपदीपनैवेद्यादिकं कृत्वा दक्षिणाद्रव्यं समर्पयेत् । ततः कुशादिसहितकर्मपात्रोदकमादाय घटं स्पृष्ट्वा सङ्कल्पयेत् । **घटदानसङ्कल्पः- ॐ तत्सदिति पूर्वसङ्कल्पमुच्चार्य अद्य अमुकगोत्रस्य अस्मात्पितुः अमुकशर्मणो यममार्गे यमदूतजन्यकष्टनिवृत्ति पूर्वकं मोक्षलाभार्थमिमं क्षीराज्यपूर्णं सुवर्णघटमग्निदैवतं घृतं मृत्युञ्जयदैवतं यथानामगोत्राय शर्मणे ब्राह्मणाय सुपूजिताय दातु महमुत्सृजे तत्सन्न मम।** इत्युक्त्वा ब्राह्मणकरे कुशजलं दद्यात् । ग्रहीता स्वस्तीत्युक्ता गृह्णीयात् । ततः इदं विष्णुरित्यादिना प्रार्थनां कुर्यात् । ततो दानप्रतिष्ठां कृत्वा ब्राह्मणाय प्रतिपादयेत् । ब्राह्मणश्च कामस्तुतिं पठेत् ।

कामस्तुतिः- सन्तप्तहाटकमयं तु घटं विधाय
ब्रह्मेशकेशवयुतं सहलोकपालैः ।
क्षीराज्यपूर्णविवरं प्रणिपत्य भक्त्या
विप्राय देहि तव दानशतैः किमन्यैः ।।

-इति प्रेतघटदानविधिः-

ooo

२. पददानविधिः

विधिनिरूपण

छाता, जुत्ता, वस्त्र, औंठी, कमण्डलु, आसन, पञ्चपात्र, तामाको थाली, लौरो, काँचो अन्न, पाकेको अन्न, द्रव्य, जनै आदि सामग्री जम्मा पारी कर्मपात्रका जलले सेचन गरी पूजा गर्नुपर्दछ । ब्राह्मणको पनि पूजा गरी पददानका सबै सामान छोएर सङ्कल्पपूर्वक ब्राह्मणलाई दिनुपर्दछ । ब्राह्मणको प्रार्थना गरी फूल अक्षता पददानका सामानमा राखी दिनुपर्दछ। त्यसपछि सङ्कल्पपूर्वक ब्राह्मणलाई दानप्रतिष्ठा दिनुपर्दछ ।

पददानविधिः- **छत्रोपानहवस्त्राणि मुद्रिका च कमण्डलुः ।**
आसनं पञ्चपात्राणि पदं पञ्चविधं स्मृतम् ।।
दण्डेन ताम्रपात्रेण ह्यामान्नैर्भोजनैरपि ।
अर्थयज्ञोपवीतैश्च पदं सम्पूर्णतां व्रजेत् ।।
त्रयोदशपदानीत्थं यथाशक्त्या विधाय च ।
त्रयोदशभ्यो विप्रेभ्यः प्रदद्याद् द्वादशेऽहनि ।।

अशक्तौ त्रीणि पदानि देयानि तत्राप्यशक्तौ एकमवश्यं देयम् ।

पददानवस्तुपूजनम् - कर्मपात्रं विधाय तत्रस्थजलेन देयवस्तूनि अभिषिच्य चन्दनाक्षत पुष्पादिभिः- **ॐ पददानीय छत्रादिसकलवस्तुभ्यो नमः** इति पूजनं कुर्यात् । ततो ब्राह्मणपूजनं कुर्यादधस्तनमन्त्रेण-

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः।।

ब्राह्मणाय नमः इति।

पददानसङ्कल्पः - **हरि ॐ तत्सदिति पूर्वसङ्कल्पमुच्चार्य अद्येह अमुकगोत्रस्य अस्मत्पितुः (मातुः, भ्रातुरित्यादि) अमुकशर्मणः (अमुकवर्मणः, अमुकगुप्तस्य,अमुकदासस्येति वा) यममार्गे रौद्रातपादिजन्यदुःखनिवारणार्थं पददानार्थमिदं छत्रमुत्तानाङ्गिरोदैवतं सन्तप्त-वालुकासिकण्टकादिजन्य- कष्टपरिहारार्थं पददानान्तर्गत इमे उपानहौ उत्तानाङ्गिरोदैवते, वस्त्रं बृहस्पतिदैवतं स्वर्णमुद्रिकां वह्नि दैवतां सुमधुरं जलं कमण्डलु च वरूणविश्वकर्मदैवते पञ्चपात्रं विश्वकर्मदैवतं यष्टिरन्नमासनं यज्ञोपवीतं द्रव्यं व्यञ्जनमित्यादि यद्वस्तु तत्तद्दैवतम्,**

अमुकगोत्राय अमुकशर्मणे सुपूजिताय विप्राय पददानत्वेन तुभ्यमहं सम्प्रददे तत्सन्न मम।
इत्यभिधाय ब्राह्मणाय दद्यात् । ततो ब्राह्मणप्रार्थनां कुर्यात् ।

ब्राह्मणप्रार्थना - **ॐ सर्वेषामेव दानानां छत्रमातपवारणम् ।**
सुखदं मोक्षदं यस्मादतः शान्तिं प्रयच्छ मे ।।
उपानहौ प्रदास्यामि कण्टकादिनिवारणे ।
सर्वत्र सुखदे नित्यमतः शान्तिं प्रयच्छ मे ।।
यतिभ्यो वैष्णवं दण्डं द्विजेभ्यो हि खनित्रयम् ।
प्रदाय परलोकेऽसौ यमदण्डं न गच्छति । इति ।

दानप्रतिष्ठाः - ततः पददानस्य सिद्ध्यर्थं दानप्रतिष्ठात्वेन द्रव्यं सङ्कल्प्य ब्राह्मणाय दद्यात् - ॐ अद्यकृतैतदस्थानीयछत्रादिवस्तुदानकर्मणः न्यूनातिरिक्तं पूरणार्थमिदं यद् द्रव्यं तद्दैवताकं पूर्वोक्तशर्मणे ब्राह्मणाय पददानप्रतिष्ठात्वेन तुभ्यमहं सम्प्रददे तत्सन्न मम ।।

-इति पददानविधिः-

०००

३ - अश्वदानविधिः (घोडा-दान)

विधिनिरूपण

अश्व (घोडा) मिलेसम्म सेतो उत्तम हुन्छ । दोषले रहित युवा र निरोग हुनुपर्छ । कलियुगमा अश्वमेधयज्ञ गर्न अशक्य हुनाले त्यसको सट्टा अश्वदान गर्नुपर्दछ । वज्रका आँखा, तामाका खुर, उनको पुच्छर, पटवस्त्रले ढाकी धान्य र रत्नमाथि राखी काठी र लगामसहित पुण्यकालमा (अथवा) मृतकको एकादशाहमा ब्राह्मणको र अश्वको वस्त्र अलङ्कारादिले परिक्रमा र चन्दनादिद्वारा पूजा गरी कानमा वा जटामा समाई कुश, तिल, जौ जल लिई सङ्कल्प गरेर ब्राह्मणका हातमा दिनुपर्दछ । घोडाको प्रार्थना गरी फूल चढाई दानप्रतिष्ठा गरी ब्राह्मणलाई दिनुपर्दछ ।

***अश्वदानविधिः*- अपवित्रः पवित्रो वा०** इति कर्मपात्रोदकेन वस्त्रालङ्कारादिभिरलङ्कृतमश्वमभिषिच्य चन्दनाक्षतादिभिः पूजयेत् । ब्राह्मणं वस्त्रालङ्कारादिभिः समभ्यर्च्य धूपदीपनैवेद्यादिकं च कारयेत् ।

सूर्यलोकान्मोक्षावाप्तिकाम इममश्वं यथोपस्करादियुतं यमदैवतं (तन्निष्क्रयीभूतद्रव्यं वा) यथानामदैवतं यथानामगोत्राय शर्मणे सुपूजिताय विप्राय तुभ्यमहं सम्प्रददे तत्सन्न मम, इति ब्राह्मणहस्ते कुशतिलजलादिकं दत्वा अश्वं प्रार्थयेत् ।

अश्वप्रार्थना - **उच्चैश्रवस्त्वमश्वानां राज्ञां विजयकारकः।**
सूर्यवाह ! नमस्तुभ्यमतः शान्तिं प्रयच्छ मे ।। इति।

ततो दानप्रतिष्ठां कुर्यात् । सुवर्णं तदभावे द्रव्यं वा कुशादिसहितमादाय ब्राह्मणहस्ते दत्वा अश्वस्य कर्णं (सटां वा) ब्राह्मणहस्ते दद्यात् । ब्राह्मणश्च **स्वस्तीत्युक्ता** गृहणीयात् । कामस्तुतिं च पठेत् ।

-इति अश्वदानविधिः-

०००

४. महिषीदानविधिः (भैंसी-दान)

विधिनिरूपण

महिषी (लैनी भैंसी) दान गर्दा सुनको टीका, सुनको सिङ, चाँदीको खुर, तामाको पीठ,

कासको कचौडी, रातो वस्त्र १ मिटर जतिले भैंसीलाई ढाकी घाँटीमा घण्टा र सप्तधान्यमाथि राखी तलका मन्त्रले प्रदक्षिणा गरी सिङमा समाई सङ्कल्प गरी पूजित ब्राह्मणलाई कुश, तिल, जौ, जल दिनुपर्दछ। भैंसीको प्रार्थना गरी सुवर्ण दानप्रतिष्ठा गर्नुपर्दछ, नसकेमा दशांश द्रव्य दानप्रतिष्ठा गर्नुपर्दछ ।

महिषीपूजनम् - महिषीं (निष्क्रयद्रव्यं वा) जलेन परिक्रम्य पादान् सर्वशरीरञ्च अभिषिच्य **यमस्वरूपायै महिष्यै नमः** इति चन्दनाक्षतादिभिरभ्यर्च्य धूपं दीपं नैवेद्यञ्च कृत्वा प्रार्थयेत् ।

महिषीप्रार्थना- **महिषि ! ब्रह्मपुत्री त्वं लक्ष्मीरूपेण संस्थिता ।**
प्रार्थितासि मया देवि ! यममार्गं निवारय ।।
महिषि ! यमरूपा त्वं विश्वामित्रविनिर्मिता ।
पूजिता हर मे पापं सर्वदानफलप्रदे ।
यथा शिवस्याप्सरसो रूपेण महिषी तथा ।
सर्वभाग्यप्रदे देवि ! दीर्घशृङ्गि नमोऽस्तु ते ।। इति।

ॐ तत्सदिति पूर्वसङ्कल्पमुच्चार्य अद्येत्यादि मम दीर्घायुष्यैहिकामुष्मिकपितृतारणोत्पन्न-शुभफलावाप्तिपूर्वकं सर्वारिष्टाविनाशार्थं शनैश्चरजनितपीडाशान्त्यर्थमिमां महिषीं सालङ्कारां रक्तमाल्यवस्त्रा वृत्तां स्वर्णशृङ्गी रौप्यखुरां हैमतिलकां सप्तधान्योपरिस्थितां घण्टाभरणां

धेनूपस्करां यमदैवत्यां (तन्निष्क्रयीभूतद्रव्यं वा) यथागोत्राय शर्मणे सुपूजिताय विप्राय तुभ्यमहं सम्प्रददे तत्सन्न मम इति। तत कुशतिलजलं ब्राह्मणहस्ते दद्यात् । प्रतिग्रहीता **देवस्य त्वा** इत्यादिपठन् स्पृष्ठदेशं स्पृष्ट्वा **स्वस्ति** इति प्रतिगृह्य कामस्तुतिं पठेत् । दाता प्रार्थयेत् -

इन्द्रादिलोकपालानां या राज्यमहिषी शुभा ।
महिषीदानमाहात्म्यात्साऽस्तु मे सर्वकामदा ।।
धर्मराजस्य साहाय्ये यस्याः पुत्रः प्रतिष्ठितः।
महिषासुरस्य जननी या साऽस्तु वरदा मम ।। इति ।

महिष्युपरि पुष्पं क्षिपेत् । ततो दानप्रतिष्ठां कुर्यात् ।

दानप्रतिष्ठासङ्कल्पः - सुवर्णं द्रव्यं वाऽदाय **ॐ तत्सदिति पूर्वसङ्कल्प मुच्चार्य मया कृतस्य महिषीदानस्य दानप्रातिष्ठार्थं यथापरिमितं सुवर्णं द्रव्यं वा पूर्वोक्तशर्मणे ब्राह्मणाय महिषीदानप्रतिष्ठात्वेन तुभ्यमहं सम्प्रददे तत्सन्न मम** इति विप्रहस्ते दद्यात् । ततो भूयसी-दक्षिणामपि यथाशक्ति सङ्कल्पूर्वकं दद्यात् ।

अनेन विधिता दत्त्वा महिषीं द्विजपुङ्गवे ।
सर्वान्कामानवाप्नोति इहलोके परत्र च ।। इति ।

हेमाद्रौ भविष्यपुराणे च।

- इति महिषीदानविधिः - ० ० ०

धेनूपस्करां यमदैवत्यां (तन्निष्क्रयीभूतद्रव्यं वा) यथागोत्राय शर्मणे सुपूजिताय विप्राय तुभ्यमहं सम्प्रददे तत्सन्न मम इति। तत कुशतिलजलं ब्राह्मणहस्ते दद्यात् । प्रातिग्रहीता **देवस्य त्वा** इत्यादिपठन् स्पृष्ठदेशं स्पृष्ट्वा **स्वस्ति** इति प्रतिगृह्य कामस्तुतिं पठेत् । दाता प्रार्थयेत् -

इन्द्रादिलोकपालानां या राज्यमहिषी शुभा ।
महिषीदानमाहात्म्यात्साऽस्तु मे सर्वकामदा ।।
धर्मराजस्य साहाय्ये यस्याः पुत्रः प्रतिष्ठितः।
महिषासुरस्य जननी या साऽस्तु वरदा मम ।। इति ।

महिष्युपरि पुष्पं क्षिपेत् । ततो दानप्रतिष्ठां कुर्यात् ।

दानप्रतिष्ठासङ्कल्पः - सुवर्णं द्रव्यं वाऽदाय **ॐ तत्सदिति पूर्वसङ्कल्प मुच्चार्य मया कृतस्य महिषीदानस्य दानप्रातिष्ठार्थं यथापरिमितं सुवर्णं द्रव्यं वा पूर्वोक्तशर्मणे ब्राह्मणाय महिषीदानप्रतिष्ठात्वेन तुभ्यमहं सम्प्रददे तत्सन्न मम** इति विप्रहस्ते दद्यात् । ततो भूयसी-दक्षिणामपि यथाशक्ति सङ्कल्पूर्वकं दद्यात् ।

अनेन विधिता दत्त्वा महिषीं द्विजपुङ्गवे ।
सर्वान्कामानवाप्नोति इहलोके परत्र च ।। इति ।

हेमाद्रौ भविष्यपुराणे च।

-इति महिषीदानविधिः- ० ० ०